Published by :
© The President,
Sri Ramakrishna Math,
Mylapore, Madras 600 004.

All Rights Reserved
Seventh Impression
VII-5M 3C-3-92
ISBN 81-7120-382-5
ISBN 81-7120-380-9

Printed in India at
Sri Ramakrishna Math Printing Press,
Mylapore, Madras 600 004.

## विषयानुक्रमणिका


पृष्ठः

शान्तिमन्त्राः . . . . . . . . . . . . . . . . . १

सूर्यनमस्कार-मन्त्राः . . . . . . . . . . . . . . २

नवग्रहनमस्कारमन्त्राः . . . . . . . . . . . . . ६३

तैत्तिरीय यजुर्ब्राह्मणे काठक-भागः—

प्रथमः प्रश्नः . . . . . . . . . . . . . . . ६७

द्वितीयः प्रश्नः . . . . . . . . . . . . . . . ८३

तृतीयः प्रश्नः . . . . . . . . . . . . . . . १०१

# ॥ शान्तिमन्त्राः ॥

ॐ सह नाववतु। सह नौ भुनक्तु। सहवीर्यंकरवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै॥ ॐ शान्तिः शान्तिः शान्तिः ॥ १ ॥

ॐ शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्॥ ॐ शान्तिः शान्तिः शान्तिः ॥ २ ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥

ॐ शान्तिः शान्तिः शान्तिः ॥ ३ ॥

## ॥ सूर्यनमस्कार - मन्त्राः ॥

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

ओम् भूः, ओम् भुवः, ओगंसुवः, ओम् महः, ओम् जनः ओम् तपः ओगं सत्यम्, ओम् तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् । ओमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ।

ममोपात्त-समस्त-दुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं करिष्यमाणस्य कर्मणः निर्विघ्नेन परिसमाप्त्यर्थं आदौ विघ्नेश्वर-पूजां करिष्ये ॥ अप उपस्पृश्य । (पुष्पाक्षतान् गृहीत्वा) ओम् गणानां त्वा गणपतिगं हवामहे कविं कवीना - मुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनश्शृण्वन्नूतिभिस्सीद सादनम् ॥

अस्मिन् हरिद्राबिम्बे सुमुखं महागणपतिं ध्यायामि, महागणपतिं आवाहयामि, आसनं समर्पयामि, पादयोः पाद्यं समर्पयामि, हस्तयोः अर्घ्यं समर्पयामि, आचमनीयं समर्पयामि, ओम् भूर्भुवस्सुवः स्नापयामि, स्नानानन्तरं आचमनीयं समर्पयामि, वस्त्रार्थं अक्षतान् समर्पयामि, उपवीतार्थं अक्षतान् समर्पयामि, आभरणार्थं अक्षतान् समर्पयामि,

दिव्यपरिमळ-गन्धान्धारयामि, हरिद्राकुङ्कुमं समर्पयामि, अक्षतान् समर्पयामि, पुष्पाणि समर्पयामि ।

ओम् सुमुखाय नमः । ओम् एकदन्ताय नमः । ओम् कपिलाय नमः । ओम् गजकर्णकाय नमः । ओम् लम्बोदराय नमः । ओम् विकटाय नमः । ओम् विघ्नराजाय नमः । ओम् विनायकाय नमः । ओम् धूमकेतवे नमः । ओम् गणाध्यक्षाय नमः । ओम् फालचन्द्राय नमः । ओम् गजाननाय नमः । ओम् वक्रतुण्डाय नमः । ओम् शूर्पकर्णाय नमः । ओम् हेरम्बाय नमः । ओम् स्कन्दपूर्वजाय नमः । ओम् सिद्धिविनायक-स्वामिने नमः । नानाविध-परिमळ-पत्र-पुष्पाणि समर्पयामि ।

धूपः । दीपः । नैवेद्यम् । ओम् भूर्भुवस्सुवः+प्रचोदयात् । देवसवितः प्रसुव । सत्यं त्वर्तेन परिषिञ्चामि । अमृतोपस्तरणमसि । ओम् प्राणाय स्वाहा, ओम् अपानाय स्वाहा, ओम् व्यानाय स्वाहा, ओम् उदानाय स्वाहा । ओम् समानाय स्वाहा । ओम् ब्रह्मणे स्वाहा । ओम् महा-गणपतये नमः कदली-फलादिकं निवेदयामि । निवेदनानन्तरं आचमनीयं समर्पयामि । मध्ये मध्ये अमृतपानीयं समर्पयामि । अमृतापिधानमसि । हस्तप्रक्षाळनं समर्पयामि । पादप्रक्षाळनं समर्पयामि । आचमनीयं समर्पयामि ॥

पूगीफलसमायुक्तं नागवल्ली-दलैर्युतम् । कर्पूर-चूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ताम्बूलं निवेदयामि ।

तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥ ओम् महागणपतये नमः कर्पूरनीराजनं सन्दर्शयामि । नीराजनानन्तरं आचमनीयं समर्पयामि, रक्षां धारयामि, मन्त्रपुष्पं समर्पयामि, सर्वोपचारान् समर्पयामि ॥

वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ । अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ इति प्रार्थयेत् ॥

## ॥ श्री सूर्यनारायणपूजा-नमस्कार-सङ्कल्पः ॥

ओं शुक्लांबरधरं विष्णुं+सर्वविघ्नोपशान्तये ॥ ओम् भूः+सुवरोम् । ममोपात्त+श्रीपरमेश्वरप्रीत्यर्थं श्रीछायासुवर्चलाम्बासमेत-श्रीसूर्यनारायणप्रीत्यर्थं श्रीसूर्यनारायणप्रसादसिद्ध्यर्थं आयुरारोग्याद्यभीष्टसिद्ध्यर्थं श्रीसूर्यनारायणपूजा-पुरस्सरं तृचकल्पेन अरुणप्रश्नेन च श्रीसूर्यनमस्कारान् करिष्ये । अप उपस्पृश्य ।

अगजानन-पद्मार्कं गजानन-महर्निशम् । अनेकदं तं भक्तानां एकदन्तमुपास्महे ॥ अस्मात् हरिद्राबिम्बात् आवाहितं महागणपतिं यथास्थानं प्रतिष्ठापयामि । शोभनार्थे क्षेमाय पुनरागमनाय च । इति विघ्नेश्वरं उद्वासयेत् ॥

कलशं गन्धपुष्पाक्षतैरभ्यर्च्य—

कलशस्य मुखे विष्णुः कण्ठे रुद्रस्समाश्रितः। मूले तत्रस्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः। अङ्गैश्च सहितास्सर्वे कलशाम्बु समाश्रिताः॥ गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥

अनेन शुद्धोदकेन पूजाद्रव्याणि आत्मानं च प्रोक्षेत्।

## ॥ कुम्भे वरुण-सूर्यनारायण-पूजा ॥

ओम् इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः॥ अस्मिन् कुम्भे सकलतीर्थाधिपतिं वरुणं ध्यायामि। वरुण-मावाहयामि।

ओम् आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेनाऽऽदेवो याति भुवना विपश्यन्॥ अस्मिन् कुम्भे श्रीछायासुवर्चलाम्बासमेतं श्रीसूर्यनारायणं ध्यायामि। श्रीसूर्यनारायणमावाहयामि। आसनं समर्पयामि, पादयोः पाद्यं समर्पयामि, हस्तयोः अर्घ्यं समर्पयामि, आचमनीयं समर्पयामि,

ओं भूर्भुवस्सुवः स्नापयामि, स्नानानन्तरं आचमनीयं समर्पयामि, वस्त्रार्थे अक्षतान् समर्पयामि, उपवीतार्थे अक्षतान् समर्पयामि, आभरणार्थे अक्षतान् समर्पयामि, दिव्य-परिमळ-गन्धान्धारयामि, हरिद्राकुङ्कुमं समर्पयामि, अक्षतान् समर्पयामि, पुष्पाणि समर्पयामि ॥

ओम् मित्राय नमः । ओम् रवये नमः । ओम् सूर्याय नमः । ओम् भानवे नमः । ओम् खगाय नमः । ओम् पूष्णे नमः । ओम् हिरण्यगर्भाय नमः । ओम् मरीचये नमः । ओम् आदित्याय नमः । ओम् सवित्रे नमः । ओम् अर्काय नमः । ओम् भास्कराय नमः । श्रीछाया-सुवर्चलाम्बासमेत-श्रीसूर्यनारायणस्वामिने नमः । नानाविधपरिमळ पत्रपुष्पाणि समर्पयामि ॥

धूपः । दीपः । नैवेद्यम् ॥ ओम् भूर्भुवस्सुवः+ब्रह्मणे स्वाहा ॥ छायासुवर्चलांबा-समेत-श्रीसूर्यनारायण-स्वामिने नमः । कदलीफलं निवेदयामि । ताम्बूलं निवेदयामि ॥

नीराजनम् ॥ ओम् भास्कराय विद्महे महद्द्युतिकराय धीमहि । तन्नो आदित्यः प्रचोदयात् । श्रीछायासुवर्चलाम्बासमेत-श्रीसूर्यनारायण-स्वामिने नमः । दिव्यमङ्गळ - कर्पूरनीराजनं सन्दर्शयामि । नीराजनानन्तरं आचमनीयं समर्पयामि, रक्षां धारयामि, मन्त्रपुष्पं समर्पयामि, स्वर्णपुष्पं समर्पयामि, दक्षिणनमस्कारान् समर्पयामि ॥

(न्यासः) ओं अस्य श्रीसूर्यनमस्कार-महामन्त्रस्य, कण्वपुत्रः प्रस्कन्न ऋषिः, अनुष्टुप् छन्दः, श्रीसूर्यनारायणो देवता। ह्रां बीजम्, ह्रीं शक्तिः ह्रूं कीलकम्। श्रीसूर्यनारायण-प्रसाद-सिद्ध्यर्थे नमस्कारे विनियोगः।

| | |
|---|---|
| ह्रां अङ्गुष्ठाभ्यां नमः | ह्रां हृदयाय नमः। |
| ह्रीं तर्जनीभ्यां नमः | ह्रीं शिरसे स्वाहा। |
| ह्रूं मध्यमाभ्यां नमः | ह्रूं शिखायै वषट्। |
| ह्रैं अनामिकाभ्यां नमः | ह्रैं कवचाय हुम्। |
| ह्रौं कनिष्ठिकाभ्यां नमः | ह्रौं नेत्रत्रयाय वौषट्। |
| ह्रः करतलकरपृष्ठाभ्यां नमः | ह्रः अस्त्राय फट्। |

भूर्भुवस्सुवरोमिति दिग्बन्धः

(ध्यानम्) उदयगिरिमुपेतं भास्करं पद्महस्तं
सकलभुवननेत्रं नूत्नरत्नोपधेयम्।
तिमिरकरिमृगेन्द्रं बोधकं पद्मिनीनां
सुरगुरुमभिवन्दे सुन्दरं विश्वरूपम्॥

लं-पृथिव्यात्मने गन्धं समर्पयामि।

हं-आकाशात्मने पुष्पाणि समर्पयामि।

यं-वाय्वात्मने धूपमाघ्रापयामि ।

रं-वह्न्यात्मने दीपं दर्शयामि ।

वं-अमृतात्मने अमृतोपहारं निवेदयामि ।

सं-सर्वात्मने सर्वोपचारान् समर्पयामि ॥

## अथ नमस्काराः

ओं गणानां त्वा गणपतिंग् हवामहे कविङ्कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनश्शृण्वन्नूतिभिस्सीद सादनम् ।

ओं महागणपतये नमः ।

उमाकोमळ-हस्ताब्ज-संभावित-ललाटिकम् ।
हिरण्यकुण्डलं वन्दे कुमारं पुष्करस्रजम् ॥

ओं कुमार-गुरवे नमः ॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात्परं ब्रह्म तस्मै श्री गुरवे नमः ॥

गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥

विनतातनयो देवः कर्मसाक्षी सुरेश्वरः ।
सप्ताश्व-स्सप्तरज्जुश्चाऽप्यरुणो मे प्रसीदतु ॥

रज्जुवेत्रकशापाणिं प्रसन्नं कश्यपात्मजम् ।
सर्वाभरणदीप्ताङ्ग-मरुणं प्रणमाम्यहम् ॥

ओं अरुणाय नमः ॥

ओम् अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ ऋग्वेदात्मने सूर्यनारायणस्वामिने नमः ॥

इषे त्वोर्जेत्वा वायवस्थोपायवस्थ देवो वस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥ यजुर्वेदात्मने सूर्यनारायणस्वामिने नमः ॥

अग्न आयाहिवीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥ सामवेदात्मने सूर्यनारायणस्वामिने नमः ॥

शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥ अथर्ववेदात्मने सूर्यनारायणस्वामिने नमः ॥

घृणिस्सूर्य आदित्यो न प्रभा वात्यक्षरम् । मधु क्षरन्ति तद्रसम् । सत्यं वै तद्रसमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् । छायासुवर्चलाम्बा-समेत-श्रीसूर्यनारायणस्वामिने नमः ॥

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रोचनम् । उपयामगृहीतोऽसि सूर्याय त्वा भ्राजस्वत एष ते योनिस्सूर्याय त्वा भ्राजस्वते । छायासुवर्चलांबा-समेत-श्रीसूर्यनारायणस्वामिने नमः ॥

ओं ह्राम् । उद्यन्नद्य मित्रमहः । मित्राय नमः ॥

ओं ह्रीम् । आरोहन्नुत्तरां दिवम् । रवये नमः ॥

ओं ह्रूम् । हृद्रोगं मम सूर्य । सूर्याय नमः ।

औ ह्रैम् । हरिमाणञ्च नाशय । भानवे नमः ॥

ओं ह्रौम् । शुकेषु मे हरिमाणम् । खगाय नमः ॥

ओं ह्रः । रोपणाकासु दध्मसि । पूष्णे नमः ॥

ओं ह्राम् । अथो हारिद्रवेषु मे । हिरण्यगर्भाय नमः ॥

औ ह्रीम् । हरिमाणन्निर्दध्मसि । मरीचये नमः ॥

ओं ह्रूम् । उदगादयमादित्यः । आदित्याय नमः ॥

ओं ह्रैम् । विश्वेन सहसा सह । सवित्रे नमः ॥

ओ ह्रौम् । द्विषन्तं मम रन्वयन् । अर्काय नमः ॥

ओं ह्रः । मो अहं द्विषतो रधम् । भास्कराय नमः ॥

ओं ह्राम् ह्रीम् । उद्यन्नद्य मित्रमहः । ओरोहन्नुत्तरां दिवम् ॥ मित्ररविभ्यां नमः ॥

ओं ह्रूम्, ह्रैम् । हृद्रोगं मम सूर्य । हरिमाणञ्च नाशय सूर्य-भानुभ्यां नमः ।

ओं ह्रौम्, ह्रः। शुकेषु मे हरिमाणम्। रोपणाकासु दध्मसि। खग-पूषभ्यां नमः ॥

ओं ह्राम् ह्रीम्। अथो हारिद्रवेषु मे। हरिमाणन्निदध्मसि। हिरण्यगर्भ-मरीचिभ्यां नमः ॥

ओं ह्रूम् ह्रैम्। उदगादयमादित्यः। विश्वेन सहसा सह। आदित्य-सवितृभ्यां नमः।

ओं ह्रौम्, ह्रः। द्विषन्तं मम रन्धयन्। मो अहं द्विषतो रंथम्। अर्क-भास्कराभ्यां नमः।

ओं ह्राम्, ह्रीम्, ह्रूम्, ह्रैम्। उद्यन्नद्य मित्रमहः। आरोहन्नुत्तरां दिवम्। हृद्रोगं मम सूर्य। हरिमाणञ्च नाशय। मित्र-रवि-सूर्य-भानुभ्यो नमः ॥

ओं ह्रौम्, ह्रः, ह्राम् ह्रीम्। शुकेषु मे हरिमाणम्। रोपणाकासु दध्मसि। अथो हारिद्रवेषु मे। हरिमाणन्निदध्मसि। खग-पूष-हिरण्यगर्भ-मरीचिभ्यो नमः ॥

ओं ह्रूम्, ह्रैम्, ह्रौम्, ह्रः। उदगादयमादित्यः। विश्वेन सहसा सह। द्विषन्तं मम रन्धयन्। मो अहं द्विषतो रंथम्। आदित्य-सवित्रर्क-भास्करेभ्यो नमः ॥

ओं ह्राम्, ह्रीम्, ह्रूम्, ह्रैम्, ह्रौम्, ह्रः। उद्यन्नद्य मित्रमहः। आरोहन्नुत्तरां दिवम्। हृद्रोगं मम सूर्य। हरिमाणञ्च नाशय। शुकेषु मे हरिमाणम्। रोपणाकासु दध्मसि। मित्र-रवि-सूर्य-भानु-खग-पूषभ्यो नमः॥

ओं ह्राम्, ह्रीम्, ह्रूम्, ह्रैम्, ह्रौम्, ह्रः। अथो हारिद्रवेषु मे। हरिमाणन्निदध्मसि। उदगादयमादित्यः। विश्वेन सहसा सह। द्विषन्तं मम रन्धयन्। मो अहं द्विषतो रधम्॥ हिरण्यगर्भ-मरीच्यादित्य-सवित्रर्क-भास्करेभ्यो नमः॥

ओं ह्राम्, ह्रीम्, ह्रूम्, ह्रैम्, ह्रौम्, ह्रः। ओं ह्राम्, ह्रीम्, ह्रूम्, ह्रैम्, ह्रौम्, ह्रः। उद्यन्नद्य मित्रमहः। आरोहन्नुत्तरां दिवम्। हृद्रोगं मम सूर्य। हरिमाणञ्च नाशय। शुकेषु मे हरिमाणम्। रोपणाकासु दध्मसि। अथो हारिद्रवेषु मे। हारिमाणन्निदध्मसि। उदगादयमादित्यः। विश्वेन सहसा सह। द्विषन्तं मम रन्धयन्। मो अहं द्विषतो रधम्। मित्र रवि-सूर्य भानु-खग-पूष-हिरण्यगर्भ-मरीच्या-दित्य-सवित्रर्क-भास्करेभ्यो नमः॥

आदित्यो वा एष एतन्मण्डलं तपति तत्र ता ऋचस्तदृचामण्डलꣳ स ऋचां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिषि पुरुषस्तानि यजूꣳषि स यजुषा मण्डलꣳ स यजुषां लोकस्सैषा त्रय्येव विद्या तपति य एषोऽन्तरादित्ये हिरण्मयः पुरुषः ॥ छायासुवर्चलांबासमेत-श्रीसूर्यनारायण-स्वामिने नमः ॥

आदित्यो वै तेज ओजो बलं यशश्चक्षुः श्रोत्रमात्मा मनो मन्युर्मनुर्मृत्युस्सत्यो मित्रो वायुराकाशः प्राणो लोकपालः कः किं कं तत्सत्यमन्नममृतो जीवो विश्वः कतमस्स्वयंभु ब्रह्मैतदमृत एष पुरुष एष भूतानामधिपतिर्ब्रह्मणस्सायुज्यꣳसलोकतामाप्नोत्येतासामेव देवतानाꣳ सायुज्यꣳ सार्ष्टिताꣳ समानलोकतामाप्नोति य एवं वेदेत्युपनिषत् ॥ श्रीछाया-सुवर्चलांबासमेत-श्रीसूर्यनारायण-स्वामिने नमः ॥

# ॥ तैत्तिरीयारण्यकम् ॥

ओं । भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्ये-माक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । ओं शान्तिः शान्तिः शान्तिः ।

ओं । भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिररङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । आपमापामपः सर्वाः । अस्मादस्मादितोऽमुतः ॥ १ ॥

अग्निर्वायुश्च सूर्यश्च । सहसंचस्करर्द्धिया । वाय्वश्वा रश्मिपतयः । मरीच्यात्मानो अद्रुहः । देवीर्भुवनसूवरीः । पुत्रवत्वाय मे सुत । महानाम्नीर्महामानाः । महसो महसस्वः । देवीः पर्जन्यसूवरीः । पुत्रवत्वाय मे सुत ॥ २ ॥

अपाश्न्युष्णिमपा रक्षः । अपाश्न्युष्णिमपारघम् । अपाघ्रामप चावर्तिम् । अपदेवीरितो हित । वज्रं देवीरजीताग्ंश्च । भुवनं देवसूवरीः । आदित्यानदितिं देवीम् । योनिनोर्ध्वमुदीषत । शिवानश्शन्तमा भवन्तु । दिव्या आप ओषधयः । सुमृडीका सरस्वति । मा ते व्योम संदृशि ॥ ३ ॥

॥ श्रीछायासुवर्चलाम्बासमेत-श्रीसूर्यनारायण-स्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ १ ॥

स्मृतिः प्रत्यक्षमैतिह्यम् । अनुमानश्चतुष्टयम् । एतैरादित्यमण्डलम् । सर्वैरेव विधास्यते । सूर्यो मरीचिमादत्ते । सर्वस्माद्भुवनादधि । तस्याः पाकविशेषेण । स्मृतं कालविशेषणम् । नदीव प्रभवात्काचित् । अक्षय्यात्स्यन्दते यथा ॥ ४ ॥

तान्नद्योऽभिसमायन्ति । सोरुस्सती न निवर्तते । एवन्नाना समुत्थानाः । कालास्संवत्सरग्ं श्रिताः । अणुशश्च महशश्च । सर्वे समवयन्त्रितम् । सतैस्सर्वैस्समाविष्टः । उरुस्सन्न निवर्तते । अतिसंवत्सरं विद्यात् । तदेव लक्षणे ॥ ५ ॥

अणुभिश्च महद्भिश्च । समारूढः प्रदृश्यते । संवत्सरः प्रत्यक्षेण । नाधिसत्वः प्रदृश्यते पटरो विक्लिधः पिङ्गः । एतद्वरुणलक्षणम् । यत्रैतदुपदृश्यते । सहस्रं तत्र नीयते । एकगुंहि शिरो नाना मुखे । कृत्स्नं तदृतुलक्षणम् ॥ ६ ॥

उभयतस्सप्तेन्द्रियाणि । जल्पितं त्वेव दिह्यते ॥ शुक्लकृष्णे संवत्सरस्य । दक्षिणवामयोः पार्श्वयोः । तस्यैषा भवति । शुक्रं ते अन्यद्यजतं ते अन्यत् । विषुरूपे अहनी द्यौरिवासि । विश्वा हि माया अवसि स्वधावः । भद्रा ते पूषन्निह रातिरस्त्विति । नात्र भुवनम् । न पूषा । न पशवः । नादित्यस्संवत्सर एव प्रत्यक्षेण प्रियतमं विद्यात् । एतद्वै संवत्सरस्य प्रियतमगुंरूपम् । योऽस्य महानर्थ उत्पत्स्यमानो भवति । इदं पुण्यं कुरुष्वेति । तमाहरणं दद्यात् ॥ ७ ॥

॥ श्रीछायासुवर्चलाम्बा-समेत श्रीसूर्यनारायणस्वामिने नमः ॥

**॥ ओं नमो नारायणाय ॥**

साकंजानागुं सप्तथमाहुरेकजम् । षडुद्यमा ऋषयो देवजा इति । तेषामिष्टानि विहितानि धामशः । स्थात्रे रेजन्ते विकृतानि रूपशः ।

को नु मर्या अमिथितः । सखा सखायमब्रवीत् । जहाको असदीषते । यस्तित्याज सखिविदंगं सखायम् । न तस्य वाच्यपि भागो अस्ति । यदीगं शृणोत्यलकगं शृणोति ॥ ८ ॥

न हि प्रवेद सुकृतस्य पन्थामिति । ऋतुरृतुना नुद्यमानः । विनंनादाभिधावः । षष्टिश्च त्रिगंशका वल्गाः । शुक्लकृष्णौ च षाष्टिकौ । सारागवस्त्रैर्जरदक्षः । वसन्तो वसुभिस्सह । संवत्सरस्य सवितुः । प्रैषकृत्प्रथमः स्मृतः । अमूनादयतेत्यन्यान् ॥ ९ ॥

अमूगंश्च परिरक्षतः । एता वाचः प्रयुज्यन्ते । यत्रैतदुपदृश्यते । एतदेव विजानीयात् । प्रमाणं कालपर्यये । विशेषणं तु वक्ष्यामः । ऋतूनां तन्निबोधत । शुक्लवासा रुद्रगणः । ग्रीष्मेणाऽऽवर्तते सह । *निजहन् पृथिवीगं सर्वाम् ॥ १० ॥

ज्योतिषाप्रतिरूप्येन सः । विश्वरूपाणि वासागंसि । आदित्यानां निबोधत । संवत्सरीणं कर्मफलम् । वर्षाभिर्ददतागं सह । अदुःखो दुःखचक्षुरिव । तद्मा पीत इव दृश्यते । शीतेनाव्यथयन्निव । रुरुदक्ष

---

*निदहन्

इव दृश्यते । ह्लादयते ज्वलतश्चैव । शाम्यतश्चास्य चक्षुषी । या वै प्रजा भ्रगूंश्यन्ते । संवत्सरात्ता भ्रगूंश्यन्ते । याः प्रतितिष्ठन्ति । संवत्सरे ताः प्रतितिष्ठन्ति । वर्षाभ्य इत्यर्थः ॥ ११ ॥

॥ श्री छायासुवर्चलाम्बा समेत श्री सूर्यनारायण स्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ ३ ॥

अक्षिदुःखोत्थितस्यैव । विप्रसन्ने कनीनिके । आङ्क्ते चाद्गणं नास्ति । ऋभूणां तन्निबोधत । कनकाभानि वासांगुसि । अहतानि निबोधत । अन्नमश्नीत मृज्मीत । अहं वो जीवनप्रदः । एता वाचः प्रयुज्यन्ते । शरद्यत्रोपदृश्यते ॥ १२ ॥

अभिधून्वन्तोऽभिघ्नन्त इव । वातवन्तो मरुद्गणाः । अमुतो जेतुमिषुमुखमिव । सन्नद्धास्सह ददृशे ह । अपध्वस्तैर्वस्तिवर्णैरिव । विशिखासः कपर्दिनः । अक्रुद्धस्य योत्स्यमानस्य । क्रुद्धस्येव लोहिनी । हेमतश्चक्षुषी विद्यात् । अक्ष्णयोः क्षिपणोरिव ॥ १३ ॥

दुर्भिक्षं देवलोकेषु । मनूनामुदकं गृहे । एता वाचः प्रवदन्तीः । वैद्युतो यान्ति शैशिरीः । ता अग्निः पवमाना अन्वैक्षत । इह जीविकामपरिपश्यन् । तस्यैषा भवति । इहेहवंस्स्वतपसः । मरुतस्सूर्यत्वचः । शर्म सप्रथा आवृणे ॥ १४ ॥

॥ श्री छायासुवर्चलाम्बा समेत श्री सूर्यनारायण स्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ ४ ॥

अतिताम्राणि वासांसि । अष्टिर्वज्रिशतघ्नि च । विश्वे देवा विप्रहरन्ति । अग्निजिह्वा असश्चत । नैव देवो न मर्त्यः । न राजा वरुणो विभुः । नाग्निर्नेन्द्रो न पवमानः । मातृक्कच्चन विद्यते । दिव्यस्यैका धनुरार्त्निः । पृथिव्यामपरा श्रिता ॥ १५ ॥

तस्येन्द्रो वम्रिरूपेण । धनुर्ज्यामछिनथ्स्वयम् । तदिन्द्रधनुरित्यज्यम् । अभ्रवर्णेषु चक्षते । एतदेव शंयोर्बार्हस्पत्यस्य । एतद्रुद्रस्य धनुः । रुद्रस्य त्वेव धनुरार्त्निः । शिर उत्पिपेष । स प्रवर्ग्योऽभवत् ।

तस्माद्यस्सर्ववर्त्मेण यज्ञेन यजते । रुद्रस्य स शिरः प्रतिदधाति । नैनग्ं रुद्र आरुको भवति । य एवं वेद ॥ १६ ॥

॥ श्री छायासुवर्चलाम्बा समेत श्री सूर्यनारायणस्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ ५ ॥

अत्यूर्ध्वाक्षोऽतिरश्चात् । शिशिरः प्रदृश्यते । नैव रूपं न वासाग्ंसि । न चक्षुः प्रतिदृश्यते । अन्योन्यं तु न हिग्ंस्रातः । सतस्तद्देवलक्षणम् । लोहितोऽक्षिण शारशीर्ष्णिः । सूर्यस्योदयनं प्रति । त्वं करोषिन्यञ्जलिकाम् । त्वं करोषि निजानुकाम् ॥ १७ ॥

निजानुकामेन्यञ्जलिका । अमी वाचमुपासतामिति । तस्मै सर्व ऋतवो नमन्ते । मर्यादाकरत्वात्प्रपुरोधाम् । ब्राह्मण आप्नोति । य एवं वेद । स खलु संवत्सर एतैस्सेनानीभिस्सह । इन्द्राय सर्वान्कामानभि-वहति । स द्रप्सः । तस्यैषा भवति ॥ १८ ॥

अवद्रप्सो अग्ंशुमतीमतिष्ठत् । इयानः कृष्णो दशभिस्सहस्रैः । आवर्तमिन्द्रः शच्या धमन्तम् । उपस्तुहि तं नृमणामथद्रामिति ।

एतयैवेन्द्रः सलावृक्या सह । असुरान् परिवृश्चति । पृथिव्यगुंशुमती । तामन्ववस्थितः संवत्सरो दिवं च । नैवं विदुषाऽऽचार्यान्तेवासिनौ । अन्योन्यस्मै द्रुह्याताम् । यो द्रुह्यति । भ्रश्यते स्वर्गाल्लोकात् । इत्यृतुमण्डलानि । सूर्यमण्डलान्याख्यायिकाः । अत ऊर्ध्वगुंसनिर्वचनाः ॥ १९ ॥

श्री छायासुवर्चलाम्बा समेत श्रीसूर्यनारायण स्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ ६ ॥

आरोगो भ्राजः पटरः पतङ्गः । स्वर्णरो ज्योतिषीमान् विभासः । ते अस्मै सर्वे दिवमातपन्ति । ऊर्जं दुहाना अनपस्फुरन्त इति । कश्यपोऽष्टमः । स महामेरुं न जहाति । तस्यैषा भवति । यत्ते शिल्पं कश्यप रोचनावत् । इन्द्रियावत्पुष्कलं चित्रभानु । यस्मिन्सूर्या अर्पितास्सप्त साकम् ॥ २० ॥

तस्मिन् राजानमधिविश्रयेममिति । ते अस्मै सर्वे कश्यपाज्ज्योतिर्लभन्ते । तान्सोमः कश्यपादधिनिर्द्धमति । भ्रस्ताकर्मकृदिवैवम् । प्राणो जीवानीन्द्रियजीवानि । सप्त शीर्षण्याः प्राणाः ।

सूर्या इत्याचार्याः । अपश्यमहमेतान्त्सप्त सूर्यानिति । पञ्चकर्णो वात्स्यायनः । सप्तकर्णश्च प्लाक्षिः ॥ २१ ॥

आनुश्रविक एव नौ कश्यप इति । उभौ वेदयिते । न हि शेकुमिव महामेरुं गन्तुम् । अपश्यमहमेतत्सूर्यमण्डलं परिवर्तमानम् । गार्ग्यः प्राणत्रातः । गच्छन्त महामेरुम् । एकं चाजहतम् । भ्राजपटर पतङ्गा निहने । तिष्ठन्नातपन्ति । तस्मादिह तप्त्रितपाः ॥ २२ ॥

अमुत्रेतरे । तस्मादिहातप्त्रितपाः । तेषामेषा भवति । सप्त सूर्या दिवमनुप्रविष्टाः । तानन्वेति पथिभिर्दक्षिणावान् । ते अस्मै सर्वे घृतमातपन्ति । ऊर्जं दुहाना अनपस्फुरन्त इति । सप्तर्त्विजस्सूर्या इत्याचार्याः । तेषामेषा भवति । सप्त दिशो नानासूर्याः ॥ २३ ॥

सप्त होतार ऋत्विजः । देवा आदित्या ये सप्त । तेभिस्सोमाभीरक्षण इति । तदप्याम्नायः । दिग्भ्राज ऋतूंन् करोति । एतयैवावृता सहस्रसूर्यताया इति वैशंपायनः । तस्यैषा भवति । यद्द्याव इन्द्र ते शतगुंशतं भूमीः । उतस्युः । नत्वा वज्रिन् सहस्रगुं सूर्याः ॥ २४ ॥

अनुनजातमष्ट रोदसी इति। नानालिङ्गत्वादृतूनां नानासूर्यत्वम्। अष्टौ तु व्यवसिता इति। सूर्यमण्डलान्यष्टात ऊर्ध्वम्। तेषामेषा भवति। चित्रं देवानामुदगादनीकम्। चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा द्यावापृथिवी अन्तरिक्षम्। सूर्य आत्मा जगतस्तस्थुषश्चेति ॥ २५ ॥

॥ श्री छायासुवर्चलाम्बा समेत श्री सूर्यनारायणस्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ ५ ॥

केदमभ्रन्निविशते। क्वायगुंसंवत्सरो मिथः। क्वाहः केयन्देव रात्री। क मासा ऋतवः श्रिताः। अर्द्धमासा मुहूर्ताः। निमेषास्त्रुटि-* भिस्सह। केमा आपो निविशन्ते। यदीतो यान्ति संप्रति। काला अप्सु निविशन्ते। आपस्सूर्ये समाहिताः ॥ २६ ॥

अभ्राण्यपः प्रपद्यन्ते। विद्युत्सूर्ये समाहिता। अनवर्णे इमे भूमी। इयं चाऽसौ च रोदसी। किंगुस्विदत्रान्तरा भूतम्। येनेमे विधृते उभे। विष्णुना विधृते भूमी। इति वत्सस्य वेदना। इरावती धेनुमती हि भूतम्। सूयवसिनी मनुषे दशस्ये ॥ २७ ॥

---

*निमेषास्तुटिभिस्सह।

व्यष्टभ्नाद्रोदसी विष्णवेते। दाधर्थ पृथिवीमभितो मयूखैः। किन्तद्विष्णोर्बलमाहुः। का दीप्तिः किं परायणम्। एको यद्धारयद्देवः। रेजती रोदसी उभे। वाताद्विष्णोर्बलमाहुः। अक्षराद्दीप्तिरुच्यते। त्रिपदाद्धारयद्देवः। यद्विष्णोरेकमुत्तमम् ॥ २८ ॥

अग्नयो वायवश्चैव। एतदस्य परायणम्। पृच्छामि त्वा परं मृत्युम्। अवमं मध्यमश्चतुम्। लोकञ्च पुण्यपापानाम्। एतत्पृच्छामि संप्रति। अमुमाहुः परं मृत्युम्। पवमानं तु मध्यमम्। अग्निरेवावमो मृत्युः। चन्द्रमाश्चतुरुच्यते ॥ २९ ॥

अनाभोगाः परं मृत्युम्। पापास्संयन्ति सर्वदा। आभोगास्त्वेवं संयन्ति। यत्र पुण्यकृतो जनाः। ततो मध्यममायन्ति। चतुमग्निं च संप्रति। पृच्छामि त्वा पापकृतः। यत्र यातयते यमः। त्वन्नस्तद्ब्रह्मन् प्रब्रूहि। यदि वेत्थाऽसतो गृहान् ॥ ३० ॥

कश्यपादुदितास्सूर्याः। पापान्निर्घ्नन्ति सर्वदा। रोदस्योरन्तर्देशेषु। तत्र न्यस्यन्ते वासवैः। तेऽशरीराः प्रपद्यन्ते। यथाऽपुण्यस्य

कर्मणः । अपाण्यपादकेशासः । तत्र तेऽयोनिजा जनाः । मृत्वा पुनर्मृत्युमापद्यन्ते । अद्यमानास्स्वकर्मभिः ॥ ३१ ॥

आशातिकाः क्रिमय इव । ततः पूयन्ते वासवैः । अपैतं मृत्युं जयति । य एवं वेद । स खल्वैवं विद्ब्राह्मणः । दीर्घश्रुत्तमो भवति । कश्यपस्यातिथिस्सिद्धगमनस्सिद्धागमनः । तस्यैषा भवति । आयस्मिन्थ्सप्त वासवाः । रोहन्ति पूर्व्या रुहः ॥ ३२ ॥

ऋषिर्ह दीर्घश्रुत्तमः । इन्द्रस्य घर्मो आतिथिरिति । कश्यपः पश्यको भवति । यत्सर्वं परिपश्यतीति सौक्ष्म्यात् । अथाग्नेरष्टपुरुषस्य । तस्यैषा भवति । अग्ने नय सुपथा राये अस्मान् । विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनः । भूयिष्ठान्ते नम उक्तिं विधेमेति ॥ ३३ ॥

श्री छायासुवर्चलाम्बा समेत श्रीसूर्यनारायण स्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ ८ ॥

अग्निश्च जातवेदाश्च । सहोजा अजिराप्रभुः । वैश्वानरो नर्यापाश्च । पङ्क्तिराधाश्च सप्तमः । विसर्पेवाऽष्टमोऽग्नीनाम् । एतेऽष्टौ

वसवः क्षिता इति । यथर्त्वेवाग्नेरर्चिर्वर्णविशेषाः । नीलार्चिश्च पीतक चिंश्चेति । अथ वायो - रेकादशपुरुषस्यैकादशस्त्रीकस्य । प्रभ्राजमा व्यवदाताः ॥ ३४ ॥

याश्च वासुकिवैद्युताः । रजताः परुषाः श्यामाः । कपिल अतिलोहिताः । ऊर्ध्वा अवपतन्ताश्च । वैद्युत इत्येकादश । नैनं वैद्युते हिनस्ति । य एवं वेद । स होवाच व्यासः पाराशर्यः । विद्युद्वध मेवाहं मृत्युमैच्छमिति । न त्वकामगंहन्ति ॥ ३५ ॥

य एवं वेद । अथ गन्धर्वगणाः । स्वानभ्राट् । अङ्घारिर्बम्भारिः । हस्तस्सुहस्तः । कृशानुर्विश्वावसुः । मूर्धन्वान् सूर्यवर्चाः । कृतिरित्ये- कादश गन्धर्वगणाः । देवाश्च महादेवाः । रश्मयश्च देवा गरगिरः ॥ ३६ ॥

नैनं गरो हिनस्ति । य एवं वेद । गौरी मिमाय सलिलानि तक्षती । एकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी

बभूवुषी। सहस्राक्षरा परमे व्योमन्निति। वाचो विशेषणम्। अथ निगदव्याख्याताः। ताननुक्रमिष्यामः। वराहवस्स्वतपसः ॥३७॥

*विद्युन्महसो धूपयः। श्वापयो गृहमेधाश्चेत्येते। ये चेमेऽशिमिविद्विषः। पर्जन्यास्सप्त पृथिवीमभिवर्षन्ति। वृष्टिभिरिति। एतयैव विभक्तिविपरीताः। सप्तभिर्वातैरुदीरिताः। अमूल्लोकानभिवर्षन्ति। तेषामेषा भवति। समानमेतदुदकम् ॥ ३८ ॥

उच्चैत्यवचाहभिः। भूमिं पर्जन्या जिन्वन्ति। दिवं जिन्वन्त्यग्नय इति। यदक्षरं भूतकृतम्। विश्वे देवा उपासते। महर्षिमस्य गोप्तारम्। जमदग्निमकुर्वत। जमदग्निराप्यायते। छन्दोभिश्चतुरुत्तरैः। राज्ञस्सोमस्य तृप्तासः ॥ ३९ ॥

ब्रह्मणा वीर्यवता। शिवा नः प्रदिशो दिशः। तच्छंयोरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवीस्वस्तिरस्तु नः। स्वस्तिर्मानु

---

*विद्युन्मयसो।

T2-3

षेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे ।
सोमपा (३) असोमपा (३) इति निगदव्याख्याताः ॥ ४० ॥

॥ श्रीछायासुवर्चलाम्बा-समेत श्रीसूर्यनारायणस्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ ९ ॥

सहस्रवृदियं भूमिः । परं व्योम सहस्रवृत् । अश्विना भुज्यू नासत्या । विश्वस्य जगतस्पती । जाया भूमिः पतिर्व्योम । मिथुनन्ता अतुर्यथुः । पुत्रो बृहस्पती रुद्रः । सरमा इति स्त्रीपुमम् । शुक्रं वामन्यद्यजतं वामन्यत् । विषुरूपे अहनी द्यौरिव स्थः ॥ ४१ ॥

विश्वा हि माया अवथः स्वधावन्तौ । भद्रा वां पूषणाविह रातिरस्तु । वासात्यौ चित्रौ जगतो निधानौ । द्यावाभूमी चरथः सगंसखायौ । तावश्विना रासभाश्वा हवं मे । शुभस्पती आगतगंसूर्यया सह । त्युग्रोह भुज्युमश्विनोदमेघे । रयिन्न कश्चिन्ममृवां (२) अवाहाः । तमूहथुर्नौभिरात्मन्वतीभिः । अन्तरिक्षप्रुड्भिरपोदकाभिः ॥ ४२ ॥

तिस्रः क्षपस्त्रिरहातिव्रजद्भिः । नासत्या भुज्युमूहथुः पतङ्गैः । समुद्रस्य धन्वन्नार्द्रस्य पारे । त्रिभीरथैश्शतपद्भिः षडश्वैः । सवितारं वितन्वन्तम् । अनुबध्नाति शांबरः । आपपूर्षंबरश्चैव । सवितारेपसोऽभवत् । त्यगुं सुतृप्तं विदित्वैव । बहुसोम गिरं वशी ॥ ४३ ॥

अन्वेति तुग्रो वक्रियान्तम् । आयसूयान्थ्सोमतृप्सुषु । स सङ्ग्रामस्तमोद्योऽत्योतः । वाचो गाः पिपाति तत् । स तद्गोभिस्स्तवाँऽत्येत्यन्ये । रक्षसानन्विताश्च ये । अन्वेति परिवृत्याऽस्तः । एवमेतौ स्थो अश्विना । ते एते द्युःपृथिव्योः । अहरहर्गर्भन्दधाथे ॥ ४४ ॥

तयोरेतौ वत्सावहोरात्रे । पृथिव्या अहः । दिवो रात्रिः । ता अविसृष्टौ । दम्पती एव भवतः । तयोरेतौ वत्सौ । अग्निश्चादित्यश्च । रात्रेर्वत्सः । श्वेत आदित्यः । अह्नोऽग्निः ॥ ४५ ॥

ताम्रो अरुणः । ता अविसृष्टौ । दम्पती एव भवतः । तयोरेतौ वत्सौ । वृत्रश्च वैद्युतश्च । अग्नेर्वृत्रः । वैद्युत आदित्यस्य । ता अविसृष्टौ । दम्पती एव भवतः । तयोरेतौ वत्सौ ॥ ४६ ॥

उष्मा च नीहारश्च । वृत्रस्योष्मा । वैद्युतस्य नीहारः । तौ तावेव प्रतिपद्येते । सेयꣳरात्री गर्भिणी पुत्रेण संवसति । तस्या वा एतदुल्बणम् । यद्रात्रौ रश्मयः । यथा गोर्गर्भिण्या उल्बणम् । एवमेतस्या उल्बणम् । प्रजयिष्णुः प्रजया च पशुभिश्च भवति । य एवं वेद । एतमुद्यन्तमपियन्तं चेति । आदित्यः पुण्यस्य वत्सः । अथ पवित्राङ्गिरसः ॥ ४७ ॥

॥ श्री छायासुवर्चलाम्बा समेत श्री सूर्यनारायण स्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ १० ॥

पवित्रवन्तः परिवाजमासते । पितैषां प्रत्नो अभिरक्षति व्रतम् । महस्समुद्रं वरुणस्तिरोदधे । धीरा इच्छेकुर्धरुणेष्वारभम् । पवित्रं ते विततं ब्रह्मणस्पते । प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न तदामो अश्नुते । शृतास इद्वहन्तस्तत्समाशत । ब्रह्मा देवानाम् । असतस्सद्ये ततक्षुः ॥ ४८ ॥

ऋषयस्सप्ताऽत्रिश्च यत् । सर्वेऽत्रयो अगस्त्यश्च । नक्षत्रैश्शंकृतोऽवसन् । अथ सवितुः श्यावाश्वस्याऽवर्तिकामस्य । अमी य ऋक्षा निहितास उच्चा । नक्तं ददृश्रे कुहचिद्दिवेयुः । अदब्धानि वरुणस्य व्रतानि । विचाकशच्चन्द्रमा नक्षत्रमेति । तत्सवितुर्वरेण्यम् । भर्गो देवस्य धीमहि ॥ ४९ ॥

धियो यो नः प्रचोदयात् । तत्सवितुर्वृणीमहे । वयन्देवस्य भोजनम् । श्रेष्ठꣳसर्वधातमम् । तुरं भगस्य धीमहि । अपागूहत सविता तृभीन् । सर्वान्दिवो अन्धसः । नक्तन्तान्यभवन्दृशे । अस्थ्यस्थ्ना* संभविष्यामः । नाम नामैव नाम मे ॥ ५० ॥

नपुꣳसकं पुमाꣳस्त्र्यस्मि । स्थावरोऽस्म्यथ जङ्गमः । यजेऽयक्षि यष्टाहे च । मया भूतान्ययक्षत । पशवो मम भूतानि । अनूबन्ध्योऽस्म्यहं विभुः । स्त्रियस्सतीः । ता उमे पुꣳस आहुः । पश्यदक्षण्वान्नविचेतदन्धः । कविर्यः पुत्रस्स इमा चिकेत ॥ ५१ ॥

यस्ता विजानाथ्सवितुः पिता सत् । अन्धो मणिमविन्दत् । तमनङ्गुलिरावयत् । अग्रीवः प्रत्यमुञ्चत् । तमजिह्वा असश्चत ।

---

* अस्थ्यस्ना ।

ऊर्ध्वमूलमवाक्छाखम् । वृक्षं यो वेद सम्प्रति । न स जातु जनः श्र
घ्यात् । मृत्युर्मा मारयादिति: । हसितगुंरुदितङ्गीतम् ॥ ५२ ॥

वीणापणवलासितम् । मृतञ्जीवं च यत्किंचित् । अङ्गानि स्
विद्धि तत् । अतृष्यगुंस्तृष्यं ध्यायत् । अस्माज्जाता मे मिथू चरन्
पुत्रो निर्ऋत्यां वैदेहः । अचेता यश्च चेतनः । स तं मणिमविन्दत्
सोऽनङ्गुलिरावयत् । सोऽग्रीवः प्रत्यमुञ्चत् ॥ ५३ ॥

सोऽजिह्वो असश्चत । नैतमृषिं विदित्वा नगरं प्रविशेत् । यदि
प्रविशेत् । मिथौ चरित्वा प्रविशेत् । तत्सम्भवस्य व्रतम् । आतमग्ने
रथन्तिष्ठ । एकाश्वमेकयोजनम् । एकचक्रमेकधुरम् । वातध्राजिगति
विभो । न रिष्यति न व्यथते ॥ ५४ ॥

नास्याक्षो यातु सज्जति । यच्छ्वेतान्रोहितागुंश्चाग्नेः । रथे
युक्त्वाऽधितिष्ठति । एकया च दशभिश्च स्वभूते । द्वाभ्यामिष्टये

त्रेगुंशत्या च । तिसृभिश्च वहसे त्रिगुंशता च । नियुद्भिर्वायविहता
विमुश्च ॥ ५५ ॥

॥ श्री छायासुवर्चलाम्बा समेत श्री सूर्यनारायण स्वामिने नमः ॥

॥ ओं नमो नारायणाय ॥ ११ ॥

आर्तनुष्व प्रर्तनुष्व । उद्धमाऽऽधम सन्धम । आदित्ये चन्द्र-
र्णानाम् । गर्भमाधेहि यः पुमान् । इतस्सिक्तगुंसूर्यगतम् । चन्द्रमसे
सङ्कृधि । वारादञ्जनयाग्रेऽग्निम् । य एको रुद्र उच्यते । असङ्ख्या-
तास्सहस्राणि । स्मर्यते न च दृश्यते ॥ ५६ ॥

एवमेतन्निबोधत । आमन्द्रैरिन्द्र हरिभिः । याहि मयूररोमभिः ।
मा त्वा केचिन्नियेमुरिन्न* पाशिनः । दधन्वेव ता इहि । मा मन्द्रै-रिन्द्र
हरिभिः । यामि मयूररोमभिः । मा मा केचिन्नियेमुरिन्न* पाशिनः ।
निधन्वेव तां (२) इमि । अणुभिश्च महद्भिश्च ॥ ५७ ॥

निघृष्वैरसमायुतैः । कालैर्हरित्वमापन्नैः । इन्द्रायाहि सहस्रयुक् ।
अग्निर्विभ्राष्टिवसनः । वायुश्श्वेतसिकद्रुकः । संवथ्सरो विषूवर्णैः । नित्या-

---

*केचिन्न्येमुरिन्न ।

स्तेऽनुचरास्तव । सुब्रह्मण्योगं सुब्रह्मण्योगं सुब्रह्मण्योम् । इन्द्रागच्छ हरि
आगच्छ मेधातिथेः । मेष वृषणश्वस्य मेने ॥ ५८ ॥

*गौरावस्कन्दिन्नहल्यायै* जार । कौशिकब्राह्मण गौतमंब्रुवाण
अरुणाश्वा इहागताः । वसवः पृथिविक्षितः । अष्टौदिग्वाससोऽग्नयः
अग्निश्च जातवेदाश्चेत्येते । ताम्राश्वास्ताम्ररथाः । ताम्रवर्णास्तथाऽसिताः
दण्डहस्ताः खादग्दतः* । इतो रुद्राः पराङ्गताः ॥ ५९ ॥

उक्तगुंस्थानं प्रमाणञ्च पुर इत । बृहस्पतिश्च सविता च
विश्वरूपैरिहागताम् । रथेनोदकवर्त्मना । अप्सुषा इति तद्द्वयोः
उक्तो वेषो वासागुंसि च । कालावयवानामितः प्रतीच्या* । वासात
इत्यश्विनोः । कोऽन्तरिक्षे शब्दङ्करोतीति । वासिष्ठो रौहिण
मीमागुंसाञ्चक्रे । तस्यैषा भवति । वाश्रेव विद्युदिति । ब्रह्मण
उदरणमसि । ब्रह्मण उदीरणमसि । ब्रह्मण आस्तरणमसि । ब्रह्मण
उपस्तरणमसि । ॥ ६० ॥

॥ श्रीछायासुवर्चलाम्बासमेत श्रीसूर्यनारायण-स्वामिने नमः ॥

**॥ ओं नमो नारायणाय ॥ १२ ॥**

---

*खादद्दतः । प्रतीज्या

अष्टयोनीमष्टपुत्राम् । अष्टपत्नीमिमां महीम् । अहं वेद न मे मृत्युः । न चामृत्युरघाहरत् । अष्टयोन्यष्टपुत्रम् । अष्टपदिदमन्तरिक्षम् । अहं वेद न मे मृत्युः । न चामृत्युरघाहरत् । अष्टयोनीमष्टपुत्राम् । अष्टपत्नीममून्दिवम् ॥ ६१ ॥

अहं वेद न मे मृत्युः । न चामृत्युरघाऽहरत् । सुत्रामाणं महीमूषु । अदितिर्द्यौरदितिरन्तरिक्षम् । अदितिर्माता स पिता स पुत्रः । विश्वे देवा अदितिः पञ्चजनाः । अदितिर्जातमदितिर्जनित्वम् । अष्टौ पुत्रासो अदितेः । ये जातास्तन्वꣳ परि । देवां (२) उपप्रैत्सप्तभिः ॥ ६२ ॥

परा मार्ताण्डमास्यत् । सप्तभिः पुत्रैरदितिः । उपप्रैत्पूर्व्यं युगम् । प्रजायै मृत्यवे तत् । परा मार्ताण्डमाभरदिति । ताननुक्रमिष्यामः । मित्रश्च वरुणश्च । धाता चार्यमा च । अꣳशश्च भगश्च । इन्द्रश्च विवस्वाꣳश्चेत्येते । हिरण्यगर्भो हꣳसश्शुचिषत् ।

ब्रह्मजज्ञानं तदित्पदमिति । गर्भः प्राजापत्यः । अथ पुरुषः सप्त पुरुषः ॥ ६३ ॥

॥ श्री छायासुवर्चलाम्बा समेत श्री सूर्यनारायणस्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ १३ ॥

योऽसौ तपन्नुदेति । स सर्वेषां भूतानां प्राणानादायोदेति । मा मे प्रजाया मा पशूनाम् । मा मम प्राणानादायोदगाः । असौ योऽस्तमेति । स सर्वेषां भूतानां प्राणानादायाऽस्तमेति । मा मे प्रजाया मा पशूनाम् । मा मम प्राणानादायाऽस्तङ्गाः । असौ य आपूर्यति । स सर्वेषां भूतानां प्राणैरापूर्यति ॥ ६४ ॥

मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरापूरिष्ठाः । असौ योऽपक्षीयति । स सर्वेषां भूतानां प्राणैरपक्षीयति । मा मे प्रजाया मा पशूनाम् । मा मम प्राणै-रपक्षेष्ठाः । अमूनि नक्षत्राणि । सर्वेषां भूतानां प्राणैरपप्रसर्पन्ति चोत्सर्पन्ति च । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपप्रस्टपत मोत्स्टपत ॥ ६५ ॥

इमे मासाश्चार्धमासाश्च । सर्वेषां भूतानां प्राणैरपप्रसर्पन्ति चोत्सर्पन्ति च । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपप्रसृपत मोत्सृपत । इम ऋतवः । सर्वेषां भूतानां प्राणैरपप्रसर्पन्ति चोत्सर्पन्ति च । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपप्रसृपत मोत्सृपत । अयगं संवत्सरः । सर्वेषां भूतानां प्राणैरपप्रसर्पति चोत्सर्पति च ॥ ६६ ॥

मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपप्रसृप मोत्सृप । इदमहः । सर्वेषां भूतानां प्राणैरपप्रसर्पति चोत्सर्पति च । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपप्रसृप मोत्सृप । इयगंरात्रिः । सर्वेषां भूतानां प्राणैरपप्रसर्पति चोत्सर्पति च । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपप्रसृप मोत्सृप । ओं भूर्भुवस्स्वः । एतद्वो मिथुनं मा नो मिथुनगंरीढ्वम् ॥ ६७ ॥

॥ श्रीछाया-सुवर्चलांबासमेत-श्रीसूर्यनारायण-स्वामिने नमः ॥

**॥ ओं नमो नारायणाय ॥ १४ ॥**

अथादित्यस्याष्टपुरुषस्य । वसूनामादित्यानागूंस्थाने स्वते-
भानि । रुद्राणामादित्यानागूंस्थाने स्वतेजसा भानि । आदित्याना
दित्यानागंस्थाने स्वतेजसा भानि । सतागूंसत्यानाम् । आदित्यान
स्थाने स्वतेजसा भानि । अभिघून्वतामभिघ्नताम् । वातवतां मरुता
आदित्यानागूंस्थाने स्वतेजसा भानि । ऋभूणामादित्यानागूं
स्वतेजसा भानि । विश्वेषान्देवानाम् । आदित्यानागूंस्थाने स्वते
भानि । संवत्सरस्य सवितुः । आदित्यस्य स्थाने स्वते
भानि । ओं भूर्भुवस्स्वः । रश्मयो वो मिथुनं मानो मिथुं
रीढ्वम् ॥ ६८ ॥

॥ श्रीछायासुवर्चलांबासमेत-श्रीसूर्यनारायण-स्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ १५ ॥

आरोगस्य स्थाने स्वतेजसा भानि । भ्राजस्य स्थाने स्वते
भानि । पटरस्य स्थाने स्वतेजसा भानि । पतङ्गस्य स्थाने स्वतेजसा भा
स्वर्णरस्य स्थाने स्वतेजसा भानि । ज्योतिषीमतस्य स्थाने स्वतेजसा भा

विमासस्य स्थाने स्वतेजसा भानि। कश्यपस्य स्थाने स्वतेजसा भानि। ओं भूर्भुवस्स्वः। आपो वो मिथुनं मा नो मिथुनगं‌रीढ्वम् ॥ ६९ ॥

॥ श्रीछायासुवर्चलाम्बासमेत श्रीसूर्यनारायण-स्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ १६ ॥

अथ वायोरेकादशपुरुषस्यैकादशस्त्रीकस्य। प्रभ्राजमानानागं-रुद्राणागंस्थाने स्वतेजसा भानि। व्यवदातानागंरुद्राणागंस्थाने स्वतेजसा भानि। वासुकिवैद्युतानागंरुद्राणागंस्थाने स्वतेजसा भानि। रजतानागं रुद्राणागंस्थाने स्वतेजसा भानि। परुषाणागंरुद्राणागंस्थाने स्वतेजसा भानि। श्यामानागंरुद्राणागंस्थाने स्वतेजसा भानि। कपिलानागं-रुद्राणागंस्थाने स्वतेजसा भानि। अतिलोहितानागंरुद्राणागंस्थाने स्वतेजसा भानि। ऊर्ध्वानागंरुद्राणागंस्थाने स्वतेजसा भानि ॥ ७० ॥

अवपतन्तानागंरुद्राणागंस्थाने स्वतेजसा भानि। वैद्युतानागं रुद्रा-णागंस्थाने स्वतेजसा भानि। प्रभ्राजमानीनागंरुद्राणीनागंस्थाने स्वेतेजसा भानि। व्यवदातीनागंरुद्राणीनागंस्थाने स्वतेजसा भानि। वासुकि-वैद्युतीनागंरुद्राणीनागंस्थाने स्वतेजसा भानि। रजतानागंरुद्राणीनागं-

स्थाने स्वतेजसा भानि । परुषाणागंरुद्राणीनागंस्थाने स्वतेजसा भानि । श्यामानागंरुद्रणीनागंस्थाने स्वतेजसा भानि । कपिलानागंरुद्राणीनागं-स्थाने स्वतेजसा भानि । अतिलोहितीनागंरुद्राणीनागंस्थाने स्वतेजसा भानि । ऊर्ध्वानागंरुद्राणीनागंस्थाने स्वतेजसा भानि । अवपतन्तीनागं-रुद्राणीनागंस्थाने स्वतेजसा भानि । वैद्युतीनागंरुद्राणीनागंस्थाने स्वतेजसा भानि । ओं भूर्भुवस्स्वः । रूपाणि वो मिथुनं मा नो मिथुनगं-रीढ्वम् ॥ ७१ ॥

॥ श्रीछायासुवर्चलांबासमेत-श्रीसूर्यनारायण-स्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ १७ ॥

अथाग्नेरष्टपुरुषस्य । अग्नेः पूर्वदिश्यस्य स्थाने स्वतेजसा भानि । जातवेदस उपदिश्यस्य स्थाने स्वतेजसा भानि । सहोजसो दक्षिण-दिश्यस्य स्थाने स्वतेजसा भानि । अजिराप्रभव उपदिश्यस्य स्थाने स्वतेजसा भानि । वैश्वानरस्याऽपरदिश्यस्य स्थाने स्वतेजसा भानि । नर्यापस उपदिश्यस्य स्थाने स्वतेजसा भानि । पङ्क्तिराघस

उदग्दिश्यस्य स्थाने स्वतेजसा भानि। विसर्पिण उपदिश्यस्य स्थाने स्वतेजसा भानि। ओं भूर्भुवस्स्वः। दिशो वो मिथुनं मा नो मिथुनग्ंरीढ्वम् ॥ ७२ ॥

॥ श्री छायासुवर्चलाम्बा समेत श्रीसूर्यनाराणस्वामिने नमः ॥

**ओं नमो नारायणाय ॥ १८ ॥**

दक्षिणपूर्वस्यान्दिशिविसर्पी नरकः। तस्मान्नः परिपाहि। दक्षिणाऽपरस्यान्दिश्यविसर्पी नरकः। तस्मान्नः परिपाहि। उत्तरपूर्वस्यान्दिशि विषादी नरकः। तस्मान्नः परिपाहि। उत्तरापरस्यान्दिश्यविषादी नरकः। तस्मान्नः परिपाहि। आ यस्मिन्त्सप्त वासवा इन्द्रियाणि शतक्रतविंत्येते ॥ ७३ ॥

॥ श्री छायासुवर्चलाम्बा समेत श्रीसूर्यनारायणस्वामिने नमः ॥

**॥ ओं नमो नारायणाय ॥ ९१ ॥**

इन्द्रघोषा वो वसुभिः पुरस्तादुपदधताम्। मनोजवसो वः पितृभिर्दक्षिणत उपदधताम्। प्रचेता वो रुद्रैः पश्चादुपदधताम्। विश्वकर्मा व आदित्यैरुत्तरत उपदधताम्। त्वष्टा वो रूपैरुपरिष्टादुप-

दधताम् । संज्ञानं वः पश्चादिति । *आदित्यस्सर्वोऽग्निः पृथिव्याम् । वायुरन्तरिक्षे । सूर्यो दिवि । चन्द्रमा दिक्षु । नक्षत्राणि स्वलोके । एवा ह्येव । एवा ह्यग्ने । एवा हि वायो । एवा हीन्द्र । एवा हि पूषन् । एवा हि देवाः ॥ ७४ ॥

॥ श्रीछायासुवर्चलाम्बा-समेत श्रीसूर्यनारायणस्वामिने नमः ॥

॥ ओं नमो नारायणाय ॥ २० ॥

आपमापामपस्सर्वाः । अस्मादस्मादितोऽमुतः । अग्निर्वायुश्च सूर्यश्च । सह संचस्करर्द्धिया । वाय्वश्वा रश्मिपतयः । मरीच्यात्मानो अद्रुहः । देवीर्भुवनसूवरीः । पुत्रवत्त्वाय मे सुत । महानाम्नीर्महामानाः । महसो महसस्स्वः ॥ ७५ ॥

देवीः पर्जन्यसूवरीः । पुत्रवत्त्वाय मे सुत । अपाऽश्न्युष्णिमपारक्षः । अपाऽश्न्युष्णिमपारघम् । अपाघ्रामप चाऽवर्तिम् । अपदेवीरितो हित । वज्रन्देवीरजीतांश्च । भुवनन्देवसूवरीः । आदित्यानदितिन्देवीम् । योनिनोर्ध्वमुदीषत ॥ ७६ ॥

---

*'सावित्रस्सर्वोऽग्निः'

भद्रङ्कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाऽक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवागूंसस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु। केतवो अरुणासश्च। ऋषयो वातरशनाः। प्रतिष्ठागूंशतधा हि। समाहितासो सहस्रधायसम्। शिवा नश्शन्तमा भवन्तु। दिव्या आप ओषधयः। सुमृडीका सरस्वति। मा ते व्योम सन्दृशि ॥ ७७ ॥

॥ श्री छायासुवर्चलाम्बा समेत श्रीसूर्यनारायणस्वामिने नमः ॥

**॥ ओं नमो नारायणाय ॥ २१ ॥**

योऽपां पुष्पं वेद। पुष्पवान् प्रजावान् पशुमान् भवति। चन्द्रमा वा अपां पुष्पम्। पुष्पवान् प्रजावान् पशुमान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति। अग्निर्वा अपामायतनम्। आयतनवान् भवति। योऽग्नेरायतनं वेद ॥ ७८ ॥

आयतनवान् भवति। आपो वा अग्नेरायतनम्। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति।

वायुर्वा अपामायतनम् । आयतनवान् भवति । यो वायोरायतनं वेद । आयतनवान् भवति ॥ ७९ ॥

आपो वै वायोरायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति । असौ वै तपन्नपामायतनम् । आयतनवान् भवति । योऽमुष्य तपत आयतनं वेद । आयतनवान् भवति । आपो वा अमुष्य तपत आयतनम् ॥ ८० ॥

आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति । चन्द्रमा वा अपामायतनम् । आयतनवान् भवति । यश्चन्द्रमस आयतनं वेद । आयतनवान् भवति । आपो वै चन्द्रमस आयतनम् । आयतनवान् भवति ॥ ८१ ॥

य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति । नक्षत्राणि वा अपामायतनम् । आयतनवान् भवति । यो नक्षत्राणामायतनं वेद । आयतनवान् भवति । आपो वै नक्षत्राणामायतनम् । आयतनवान् भवति । य एवं वेद ॥ ८२ ॥

योऽपामायतनं वेद । आयतनवान् भवति । पर्जन्यो वा अपामायतनम् । आयतनवान् भवति । यः पर्जन्यस्यायतनं वेद । आयतनवान् भवति । आपो वै पर्जन्यस्याऽऽयतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद ॥ ८३ ॥

आयतनवान् भवति । संवत्सरो वा अपामायतनम् । आयतनवान् भवति । यस्संवत्सरस्यायतनं वेद । आयतनवान् भवति । आपो वै संवत्सरस्यायतनम् । आयतनवान् भवति । य एवं वेद । योऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ॥ ८४ ॥

इमे वै लोका अप्सु प्रतिष्ठिताः । तदेषाऽभ्यनूक्ता । अपाꣳरसमुदयꣳसन् । सूर्ये शुक्रꣳसमाभृतम् । अपाꣳरसस्य यो रसः । तं वो गृह्णाम्युत्तममिति । इमे वै लोका अपाꣳरसः । तेऽमुष्मिन्नादित्ये समाभृताः । जानुदघ्नीमुत्तरवेदीङ्खात्वा । अपां पूरयित्वा गुल्फदघ्नम् ॥ ८५ ॥

पुष्करपर्णैः पुष्करदण्डैः पुष्करैश्च सगंस्तीर्य । तस्मिन्विहायसे । अग्निं प्रणीयोपसमाधाधार्य । ब्रह्मवादिनो वदन्ति । कस्मात्प्रणीतेऽय-मग्निश्चीयते । साप्रणीतेऽयमप्सु ह्ययंश्चीयते । असौ भुवनेप्यनाहि-ताग्निरेताः । तमभित एता अबीष्टका उपदधाति । अग्निहोत्रे दर्शपूर्ण-मासयोः । पशुबन्धे चातुर्मास्येषु ॥ ८६ ॥

अथो आहुः । सर्वेषु यज्ञक्रतुष्विति । एतद्ध स्म वा आहुश्शण्डिलाः । कमग्निश्चिनुते । सत्रियमग्निश्चिन्वानः । संवत्सरं प्रत्यक्षेण । कमग्निश्चिनुते । सावित्रमग्निश्चिन्वानः । अमुमादित्यं प्रत्यक्षेण । कमग्निश्चिनुते ॥ ८७ ॥

नाचिकेतमग्निश्चिन्वानः । प्राणान्प्रत्यक्षेण । कमग्निश्चिनुते । चातुर्होत्रियमग्निश्चिन्वानः । ब्रह्म प्रत्यक्षेण । कमग्निश्चिनुते । वैश्वसृजमग्निश्चिन्वानः । शरीरं प्रत्यक्षेण । कमग्निश्चिनुते । उपानु-वाक्यमाशुमग्निश्चिन्वानः ॥ ८८ ॥

इमान् लोकान्प्रत्यक्षेण । कर्मभिश्चिनुते । इममारुणकेतुक-मग्निञ्चिन्वान इति । य एवासौ । इतश्चाऽमुतश्चाऽव्यतीपाती । तमिति । योऽग्नेर्मिथूया वेद । मिथुनवान्भवति । आपो वा अग्नेर्मिथूयाः । मिथुनवान्भवति । य एवं वेद ॥ ८९ ॥

॥ श्रीछाया-सुवर्चलांबासमेत-श्रीसूर्यनारायण-स्वामिने नमः ॥

॥ ओं नमो नारायणाय ॥ २२ ॥

आपो वा इदमासन्त्सलिलमेव । स प्रजापतिरेकः पुष्करपर्णे समभवत् । तस्यान्तर्मनसि कामस्समवर्तत । इदग्ंसृजेयमिति । सतस्मा-द्यत्पुरुषो मनसाभिगच्छति । तद्वाचा वदति । तत्कर्मणा करोति । तदेषाऽभ्यनूक्ता । कामस्तदग्रे समवर्तताधि । मनसो रेतः प्रथमं यदासीत् ॥ ९० ॥

सतो बन्धुमसति निरविन्दन् । हृदि प्रतीष्या कवयो मनीषेति । उपैनन्तदुपनमति । यत्कामो भवति । य एवं वेद । तपोऽतप्यत । स तपस्तप्त्वा । शरीरमधूनुत । तस्य यन्मांसमासीत् । सततोऽरुणाः केतवो वातरशना ऋषय उदतिष्ठन् ॥ ९१ ॥

ये नखाः । ते वैखानसाः । ये वालाः । ते वालखिल्याः
यो रसः । सोऽपाम् । अन्तरतः कूर्मं भूतग्ंसर्पन्तम् । तमब्रवीत् । म
वैत्वङ्मागंसा । समभूत् ॥ ९२ ॥

नेत्यब्रवीत् । पूर्वमेवाहमिहासमिति । तत्पुरुषस्य पुरुषत्वम्
स सहस्रशीर्षा पुरुषः । सहस्राक्षस्सहस्रपात् । भूत्वोदतिष्ठत् । त
ब्रवीत् । त्वं वै पूर्वग्ंसमभूः । त्वमिदं पूर्वः कुरुष्वेति । स इ
आदायापः ॥ ९३ ॥

अञ्जलिना पुरस्तादुपादधात् । एवाह्येवेति । ततं आदित्य
उदतिष्ठत् । सा प्राची दिक् । अथाऽरुणः केतुर्दक्षिणत उपादधात्
एवाह्यग्ने इति । ततो वा अग्निरुदतिष्ठत् । सा दक्षिणा दिक्
अथारुणः केतुः पश्चादुपादधात् । एवाहि वायो इति ॥ ९४ ॥

ततो वायुरुदतिष्ठत् । सा प्रतीची दिक् । अथारुणः केतुरुत्तर
उपादधात । एवाहीन्द्रेति । ततो वा इन्द्र उदतिष्ठत् । सोदीची दिक्
अथारुणः केतुर्मध्य उपादधात् । एवाहि पूषन्निति । ततो है
पूषोदतिष्ठत् । सेयन्दिक् ॥ ९५ ॥

अथारुणः केतुरुपरिष्टादुपादधात् । एवाहि देवा इति । ततो देवमनुष्याः पितरः । गन्धर्वाप्सरसश्चोदतिष्ठन् । सोर्ध्वा दिक् । या विप्रुषो विपरापतन् । ताभ्योऽसुरा रक्षाग्ंसि पिशाचाश्चोदतिष्ठन् । तस्मात्ते पराभवन् । विप्रुड्भ्यो हि ते समभवन् । तदेषाभ्यनूक्ता ॥९६॥

आपो ह यद्बृहतीर्गर्भमायन् । दक्षन्दधाना जनयन्तीस्स्वयंभुम् । तत इमेऽद्ध्यसृज्यन्त सर्गाः । अद्भ्यो वा इदग्ं समभूत । तस्मादिदग्ंसर्वं ब्रह्म स्वयंभ्विति । तस्मादिदग्ंसर्वग्ंशिथिलमिवाऽध्रुव-मिवाभवत् । प्रजापतिर्वाव तत् । आत्मनात्मानं विधाय । तदेवानुप्राविशत् । तदेषाभ्यनूक्ता ॥ ९७ ॥

विधाय लोकान् विधाय भूतानि । विधाय सर्वाः प्रदिशो दिशश्च । प्रजापतिः प्रथमजा ऋतस्य । आत्मनात्मानमभिसंवि-वेशेति । सर्वमेवेदमाप्त्वा । सर्वमवरुध्य । तदेवानुप्रविशति । य एवं वेद ॥ ९८ ॥

॥ श्री छायासुवर्चलाम्बा समेत श्री सूर्यनारायणस्वामिने नमः ॥

**॥ ओं नमो नारायणाय ॥ २३ ॥**

चतुष्टय्य आपो गृह्णाति । चत्वारि वा अपागूंरूपाणि । मेघं विद्युत् । स्तनयित्नुर्वृष्टिः । तान्येवावरुन्धे । आतपति वर्ष्या गृह्णाति ताः पुरस्तादुपदधाति । एता वै ब्रह्मवर्चस्या आपः । मुखत एव ब्रह्म वर्चसमवरुन्धे । तस्मान्मुखतो ब्रह्मवर्चसितरः ॥ ९९ ॥

कूप्या गृह्णाति । ता दक्षिणत उपदधाति । एता वै तेजस्विनीरापः । तेज एवाऽस्य दक्षिणतो दधाति । तस्माद्दक्षिणोऽर्धस्तेजस्वितरः स्थावरा गृह्णाति । ताः पश्चादुपदधाति । प्रतिष्ठिता वै स्थावराः पश्चादेव प्रतितिष्ठति । वहन्तीर्गृह्णाति ॥ १०० ॥

ता उत्तरत उपदधाति । ओजसा वा एता वहन्तीरिवोद्धतीरिव आकूजतीरिव धावन्तीः । ओज एवास्योत्तरतो दधाति । तस्मादुत्तरोऽर्ध ओजस्वितरः । संभार्या गृह्णाति । ता मध्य उपदधाति । इयं वै संभार्याः । अस्यामेव प्रतितिष्ठति । पल्वल्या गृह्णाति । ता उपरिष्टादुपादधाति ॥ १०१ ॥

असौ वै पस्वस्याः । अमुष्यामेव प्रतितिष्ठति । दिक्षूपदधाति ।
दिक्षु वा आपः । अन्नं वा आपः । अद्भ्यो वा अन्नञ्जायते । यदे-
वाद्भ्योऽन्नञ्जायते । तदवरुन्धे । तं वा एतमरुणाः केतवो वातरशना
ऋषयोऽचिन्वन् । तस्मादारुणकेतुकः ॥ १०२ ॥

तदेषाभ्यनूक्ता । केतवो अरुणासश्च । ऋषयो वातरशनाः ।
प्रतिष्ठागुंशतधाहि । समाहितासो सहस्रधायसमिति । शतशश्चैव सहस्रशश्च
प्रतितिष्ठति । य एतमग्निञ्चिनुते । य उचैनमेवं वेद ॥ १०३ ॥

श्री छायासुवर्चलाम्बा समेत श्रीसूर्यनारायण स्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ २४ ॥

जानुदघ्नीमुत्तरवेदीङ्खात्वा । अपां पूरयति । अपागुंसर्वत्वाय ।
पुष्करपर्णगुंरुक्मं पुरुषमित्युपदधाति । तपो वै पुष्करपर्णम् । सत्यगुं-
रुक्मः । अमृतं पुरुषः । एतावद्वा वास्ति । यावदेतत् । यावदेवास्ति ॥

तदवरुन्धे । कूर्ममुपदधाति । अपामेव मेधमवरुन्धे । अथो
स्वर्गस्य लोकस्य समष्ट्यै । आपमापामपस्सर्वाः । अस्मादस्मादितोऽमुतः ।

अग्निर्वायुश्च सूर्यश्च । सहसञ्चस्करर्द्धिया इति । वाय्वश्वा रश्मिपतयः । लोकं पृणच्छिद्रं पृण ॥ १०५ ॥

यास्तिस्रः परमजाः । इन्द्रघोषा वो वसुभिरेवाह्येवेति । पञ्चचितय उपदधाति । पाङ्क्तोऽग्निः । यावानेवाग्निः । तञ्चिनुते । लोकंपृणया द्वितीयामुपदधाति । पञ्च पदा वै विराट् । तस्या वा इयं पादः । अन्तरिक्षं पादः । द्यौः पादः । । दिशः पादः । परोरजाः पादः । विराज्येव प्रतितिष्ठति । य एतमग्निञ्चिनुते । य उचैनमेवं वेद ॥ १०६ ॥

॥ श्री छाया-सुवर्चलाम्बा-समेत-श्रीसूर्यनारायणस्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ २५ ॥

अग्निं प्रणीयोपसमाधाय । तमभित एता अबीष्टका उपदधाति । अग्निहोत्रे दर्शपूर्णमासयोः । पशुबन्धे चातुर्मास्येषु । अथो आहुः । सर्वेषु यज्ञक्रतुष्विति । अथ हस्माहारुणस्स्वायंभुवः । सावित्रः सर्वोऽग्निरित्यननुषङ्गं मन्यामहे । नाना वा एतेषां वीर्याणि । कमग्निञ्चिनुते ॥ १०७ ॥

सत्रियमग्निञ्चिन्वानः । कमग्निञ्चिनुते । सावित्रमग्निञ्चिन्वानः । कमग्निञ्चिनुते । नाचिकेतमग्निञ्चिन्वानः । कमग्निञ्चिनुते । चातुर्होत्रियमग्निञ्चिन्वानः । कमग्निञ्चिनुते । वैश्वसृजमग्निञ्चिन्वानः । कमग्निञ्चिनुते ॥ १०८ ॥

उपानुवाक्यमाशुमग्निञ्चिन्वानः । कमग्निञ्चिनुते । इममारुणकेतुकमग्निञ्चिन्वान इति । वृषा वा अग्निः । वृषाणौ सꣳस्फालयेत् । हन्येतास्य यज्ञः । तस्मान्नानुषज्यः । सोत्तरवेदिषु क्रतुषु चिन्वीत । उत्तरवेद्याꣳ ह्यग्निश्चीयते । प्रजाकामश्चिन्वीत ॥ १०९ ॥

प्राजापत्यो वा एषोऽग्निः । प्राजापत्याः प्रजाः । प्रजावान् भवति । य एवं वेद । पशुकामश्चिन्वीत । संज्ञानं वा एतत् पशूनाम् । यदापः । पशूनामेव संज्ञानेऽग्निञ्चिनुते । पशुमान् भवति । य एवं वेद ॥ ११० ॥

वृष्टिकामश्चिन्वीत । आपो वै वृष्टिः । पर्जन्यो वर्षुको भवति । य एवं वेद । आमयावी चिन्वीत । आपो वै भेषजम् ।

भेषजमेवास्मै करोति । सर्वमायुरेति । अभिचरगूंश्चिन्वीत । वज्रो वा आपः ॥ १११ ॥

वज्रमेव भ्रातृव्येभ्यः प्रहरति । स्तृणुत एनम् । तेजस्कामो यशस्कामः । ब्रह्मवर्चसकामस्स्वर्गकामश्चिन्वीत । एतावद्वा वास्ति । यावदेतत् । यावदेवास्ति । तदवरुन्धे । तस्यैतद्व्रतम् । वर्षति न धावेत् ॥ ११२ ॥

अमृतं वा आपः । अमृतस्यानन्तरित्यै । नाप्सु मूत्रपुरीषं कुर्यात् । न निष्ठीवेत् । न विवसनस्स्नायात् । गुह्यो वा एषोऽग्निः । एतस्याग्नेरनतिदाहाय । न पुष्करपर्णानि हिरण्यंवाऽधितिष्ठेत् । एतस्याग्नेरनभ्यारोहाय । न कूर्मस्याश्नीयात् । नोदकस्याघातुकान्येनमोदकानि भवन्ति । अघातुका आपः । य एतमग्निञ्चिनुते । य उचैनमेवं वेद ॥ ११३ ॥

॥ श्री छायासुवर्चलाम्बा समेत श्रीसूर्यनारायणस्वामिने नमः ॥

॥ ओं नमो नारायणाय ॥ २६ ॥

इमानुकं भुवना सीषधेम । इन्द्रश्च विश्वे च देवाः । यज्ञञ्च नस्तन्वञ्च प्रजाञ्च । आदित्यैरिन्द्रस्सह सीषधातु । आदित्यैरिन्द्रस्सगणो मरुद्भिः । अस्माकं भूत्वविता तनूनाम् । आप्लवस्व प्रप्लवस्व । आण्डीभव ज मा मुहुः । सुखादीन्दुःखनिधनाम् । प्रतिमुञ्चस्व स्वां पुरम् ॥ ११४ ॥

मरीचयस्स्वायंभुवाः । ये शरीराण्यकल्पयन् । ते ते देहङ्कल्पयन्तु । मा च ते ख्यास्म तीरिषत् । उत्तिष्ठत मा स्वप्त । अग्निमिच्छध्वं भारताः । राज्ञस्सोमस्य तृप्तासः । सूर्येण सयुजोषसः । युवा सुवासाः । अष्टाचक्रा नवद्वारा ॥ ११५ ॥

देवानां पूरयोध्या । तस्याꣳहिरण्मयः कोशः । स्वर्गो लोको ज्योतिषाऽऽवृतः । यो वैतां ब्रह्मणो वेद । अमृतेनाऽऽवृतां पुरीम् । तस्मै ब्रह्म च ब्रह्मा च । आयुः कीर्तिं प्रजान्ददुः । विभ्राजमानानाꣳ-हरिणीम् । यशसा संपरीवृताम् । पुरꣳहिरण्मयीं ब्रह्मा ॥ ११६ ॥

विवेशाऽपराजिता । पराङेत्यज्यामयी । पराङेत्यनाशकी । इह-चामुत्रचान्वेति । विद्वान्देवासुरानुभयान् । यत्कुमारी मन्द्रयते । यद्यो-

षिद्यत्यतिव्रता । अरिष्टं यत्किंच क्रियते । अग्निस्तदनुवेधति । अभृता-सश्शृतासश्च ॥ ११७ ॥

यज्वानो येऽप्ययज्वनः । स्वर्यन्तो नापेक्षन्ते । इन्द्रमग्निञ्च ये विदुः । सिकता इव संयन्ति । रश्मिभिस्समुदीरिताः । अस्माल्लोका दमुष्माच्च । ऋषिभिरदात्पृश्निभिः । अपेत वीत वि च सर्पतातः । येऽत्रस्थ पुराणा ये च नूतनाः । अहोभिरद्भिरक्तुभिर्व्यक्तम् ॥ ११८ ॥

यमो ददात्ववसानमस्मै । नृ मुणन्तु नृपात्वर्यः । अकृष्टा ये च कृष्टजाः । कुमारीषु कनीनीषु । जारिणीषु च ये हिताः । रेतःपीता आण्डपीताः । अङ्गारेषु च ये हुताः । उभयान् पुत्रपौत्रकान् । युवेऽहं यमराजगान् । शतमिन्नु शरदः ॥ ११९ ॥

अदो यद्ब्रह्म विलबम् । पितृणाञ्च यमस्य च । वरुणस्याश्विनोरग्नेः । मरुताञ्च विहायसाम् । कामप्रयवणं मे अस्तु । स ह्येवास्मि सनातनः । इति नाको ब्रह्मिश्रवो* रायो धनम् । पुत्रानापो देवीरिहाऽऽहिता ॥ १२० ॥

---

*ब्रह्मश्रवो

॥ श्री छायासुवर्चलाम्बा-समेत-श्रीसूर्यनारायणस्वामिने नमः ॥

॥ ओं नमो नारायणाय ॥ २७ ॥

विशीर्ष्णीङ्गृध्रशीर्ष्णींश्च। अपेतो निर्ऋतिंगृहथः। परिबाधग्ं श्वेतकुक्षम्। निजङ्घग्ंशबलोदरम्। स तान् वाच्यायया सह। अग्ने नाशय सन्दृशः। ईर्ष्यासूये बुभुक्षाम्। मन्युं कृत्याञ्च दीधिरे। रथेन किंशुकावता। अग्ने नाशय सन्दृशः ॥ १२१ ॥

॥ श्रीछायासुवर्चलाम्बासमेत-श्रीसूर्यनारायणस्वामिने नमः ॥

॥ ओं नमो नारायणाय ॥ २८ ॥

पर्जन्याय प्रगायत। दिवस्पुत्राय मीढुषे। स नो यवस-मिच्छतु*। इदं वचः पर्जन्याय स्वराजे। हृदो अस्त्वन्तरन्तद्युयोत। मयोभूर्वातो विश्वकृष्टयस्सन्त्वस्मे। सुपिप्पला ओषधीर्देवगोपाः। यो गर्भमोषधीनाम्। गवाङ्कृणोत्यर्वताम्। पर्जन्यः पुरुषीणाम् ॥ १२२ ॥

॥ श्रीछाया-सुवर्चलांबासमेत-श्रीसूर्यनारायण-स्वामिने नमः ॥

॥ ओं नमो नारायणाय ॥ २९ ॥

---

* यवसमृच्छतु।

पुनर्मामैत्विन्द्रियम् । पुनरायुः पुनर्भगः । पुनर्ब्राह्मणमैतु मा । पुनर्द्रविणमैतु मा । यन्मेऽद्य रेतः पृथिवीमस्कान् । यदोषधीरप्यसरद्यदापः । इदन्तत्पुनराददे । दीर्घायुत्वाय वर्चसे । यन्मे रेतः प्रसिच्यते । यन्म आजायते पुनः । तेन माममृतङ्कुरु । तेन सुप्रजसङ्कुरु ॥ १२३ ॥

॥ श्री छाया-सुवर्चलाम्बा-समेत-श्रीसूर्यनारायणस्वामिने नमः ॥

॥ ओं नमो नारायणाय ॥ ३० ॥

अङ्क्यस्तिरोधाऽजायत । तव वैश्रवणस्सदा । तिरोधेहि सपत्नान्नः । ये अपोऽश्नन्ति केचन । त्वाष्ट्रीं मायां वैश्रवणः । रथगुंसहस्रवन्धुरम् । पुरुश्चक्रगुंसहस्राश्वम् । आस्थायायाहि नो बलिम् । यस्मै भूतानि बलिमावहन्ति । धनङ्गावो हस्तिहिरण्यमश्वान् ॥ १२४ ॥

असाम सुमतौ यज्ञियस्य । श्रियं बिभ्रतोऽन्नमुखीं विराजम् । सुदर्शने च क्रौञ्चे च । मैनागे च महागिरौ । *सतद्वाट्टारगमन्ता । सगुंहार्यन्नगरं तव । इति मन्त्राः । कल्पोऽत ऊर्ध्वम् । यदि बलिगुंहरेत् । हिरण्यनाभये वितुदये कौबेरायायं बलिः ॥ १२५ ॥

---

* शतद्वा

सर्वभूताधिपतये नम इति । अथ बलिग्ं हृत्वोपतिष्ठेत । क्षत्रं क्षत्रं वैश्रवणः । ब्राह्मणा वयग्ंस्मः । नमस्ते अस्तु मा मा हिग्ंसीः । अस्मात्प्रविश्यान्नमद्धीति । अथ तमग्निमादधीत । यस्मिन्नेतत्कर्म प्रयुञ्जीत । तिरोधा भूः । तिरोधा भुवः ॥ १२६ ॥

तिरोधास्स्वः । तिरोधा भूर्भुवस्स्वः । सर्वेषां लोकानामाधिपत्ये सीदेति । अथ तमग्निमिन्धीत यस्मिन्नेतत्कर्म प्रयुञ्जीत । तिरोधा भूस्स्वाहा । तिरोधा भुवस्स्वाहा । तिरोधास्स्वस्स्वाहा । तिरोधा भूर्भुवस्स्वस्स्वाहा । यस्मिन्नस्य काले सर्वा आहुतीर्हुता भवेयुः ॥ १२७ ॥

अपि ब्राह्मणमुखीनाः । तस्मिन्नह्नः काले प्रयुञ्जीत । परस्सुप्तजनाद्वेपि । मास्म प्रमाद्यन्तमाध्यापयेत् । सर्वार्थास्सिद्ध्यन्ते । य एवं वेद । क्षुध्यन्निदमजानताम् । सर्वार्था न सिद्ध्यन्ते । यस्ते विघातुको भ्राता । ममान्तर्हृदये श्रितः ॥ १२८ ॥

तस्मा इममग्रपिण्डञ्जुहोमि । स मेऽर्थान्मा विवधीत् । मयि स्वाहा । राजाधिराजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे ।

स मे कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः । केतवो अरुणासश्च । ऋषयो वातरशनाः । प्रतिष्ठाꣳशतधा हि । समाहितासो सहस्रधायसम् । शिवानश्शन्तमा भवन्तु । दिव्या आप ओषधयः । सुमृडीका सरस्वति । मा ते व्योम सन्दृशि ॥ १२९ ॥

॥ श्री छायासुवर्चलाम्बा-समेत-श्रीसूर्यनारायण-स्वामिने नमः ॥

## ॥ ओं नमो नारायणाय ॥ ३१ ॥

संवत्सरमेतद्व्रतञ्चरेत् । द्वौ वा मासौ । नियमस्समासेन । तस्मिन्नियमविशेषाः । त्रिषवणमुदकोपस्पर्शी । चतुर्थकालपानभक्तस्स्यात् । अहरहर्वा भैक्षमश्नीयात् । औदुंबरीभिस्समिद्भिरग्निं परिचरेत् । पुनर्मामैत्त्विन्द्रियमित्येतेनाऽनुवाकेन । उद्धृतपरिपूताभिरद्भिः कार्यङ्कुर्वीत ॥ १३० ॥

असञ्चयवान् । अग्नये वायवे सूर्याय । ब्रह्मणे प्रजापतये । चन्द्रमसे नक्षत्रेभ्यः । ऋतुभ्यस्संवत्सराय । वरुणायारुणायेति व्रतहोमाः ।

प्रवर्ग्यवंदादेशः । अरुणाः कौण्डऋषयः । अरण्येऽधीयीरन् । भद्रङ्कर्णे-मिरिति द्वे जपित्वा ॥ १३१ ॥

महानाम्नीभिरुदकगुंसंगुंस्पर्श्य । तमाचार्यो दद्यात् । शिवा-नश्शन्तमेत्योषधीरालभते । सुमृडीकेति भूमिम् । एवमपवर्गे । धेनुर्द-क्षिणा । कगुंसं वासश्च क्षौमम् । अन्यद्वा शुक्लम् । यथाशक्ति वा । एवगुंस्वाध्यायधर्मेण । अरण्येऽधीयीत । तपस्वी पुण्यो भवति तपस्वी पुण्यो भवति ॥ १३२ ॥

श्री छायासुवर्चलाम्बा-समेत-श्रीसूर्यनारायणस्वामिने नमः ॥

**॥ ओं नमो नारायणाय ॥ ३२ ॥**

भद्रङ्कर्णेभिश्शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरै-रङ्गैस्तुष्टुवागुंसस्तनूभिः । व्यशेम देवहितं यदायुः ॥ स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥ १३३ ॥

॥ ओं शान्तिः शान्तिः शान्तिः ॥

भानो भास्कर मार्ताण्ड चण्डरश्मे दिवाकर ।
आयुरारोग्यमैश्वर्यं श्रियं पुत्रांश्च देहि मे ॥

धृतपद्मद्वयं भानुं तेजोमण्डलमध्यगम् ।
सर्वव्याधिशमनं छायाश्लिष्टतनुं भजे ॥

सौरमण्डल-मध्यस्थं साम्बं संसार-भेषजम् ।
नीलग्रीवं विरूपाक्षं नमामि शिवमव्ययम् ॥

---

॥ श्रीः ॥

# ॥ नवग्रहनमस्कारमन्त्राः ॥

—0—

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ओं भूः, ओं भुवः, ओगुंस्सुवः, ओं महः, ओं जनः, ओं तपः, ओगुंसत्यम् । ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । ओमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं आदित्यादि-नवग्रहदेवता-प्रसादसिद्ध्यर्थं आदित्यादि-नवग्रहनमस्कारान् करिष्ये ॥ (इति संकल्प्य)

ओं आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्ययेन सविता रथेनाऽऽदेवो याति भुवना विपश्यन् ॥ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् । येषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम् । निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु ॥ ओं अधिदेवता-प्रत्यधिदेवता-सहिताय आदित्याय नमः ॥ १ ॥

ओं, अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपागूं-रेतागूंसि जिन्वति ॥ स्योना पृथिवि भवाऽनृक्षरा निवेशनी । यच्छानश्शर्म सप्रथाः ॥ क्षेत्रस्य पतिना वयगूंहितेनेव जयामसि । गामश्वं पोषयित्न्वा स नो मृडातीदृशे ॥ ओं अधिदेवता-प्रत्यधिदेवता-सहिताय अङ्गारकाय नमः ॥ २ ॥

ओं, प्रवश्शुक्राय भानवे भरध्वगूंहव्यं मतिञ्चाग्नये सुपूतम् । यो दैव्यानि मानुषा जनूगूंष्यतर्विश्वानि विद्म ना जिगाति ॥ इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम् । न ह्यस्या अपरञ्चन जरसा मरते पतिः ॥ इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥ ओं अधिदेवता-प्रत्यधिदेवता-सहिताय शुक्राय नमः ॥ ३ ॥

ओं, आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम् । भवा वाजस्य संगथे ॥ अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा । अग्निञ्च विश्वशंभुवमापश्च विश्वभेषजीः ॥ गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥ ओं, अधिदेवता-प्रत्यधिदेवता-सहिताय सोमाय नमः ॥ ४ ॥

ओं, उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते सगुंसृजेथामयञ्च ॥ पुनःकृण्वगुंस्त्वा पितरं युवानमन्वातागुंसीत्त्वयि तन्तुमेतम् ॥ इदं विष्णुर्वि चक्रमे त्रेधा निदधे पदम् । समूढमस्य पागुंसुरे ॥ विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोश्श्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥ ओं अधिदेवता-प्रत्यधिदेवता-सहिताय बुधाय नमः॥५॥

ओं, बृहस्पते अतियदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसर्तप्रजात तदस्मासु द्रविणन्धेहि चित्रम् ॥ इन्द्रमरुत्व इह पाहि सोमं यथा शार्याते अपिबस्सुतस्य । तव प्रणीती तव शूरशर्मन्ना-विवासन्ति कवयस्सुयज्ञाः ॥ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः । सबुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः ॥ ओं अधिदेवता-प्रत्यधिदेवता-सहिताय बृहस्पतये नमः ॥ ६ ॥

ओं, शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयगुंस्याम पतयो रयीणाम् ॥ इमं यमप्रस्तरमाहि सीदाऽङ्गिरोभिः पितृभिस्संविदानः । आत्वा मन्त्राः

कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥ ओं, अधिदेवता-प्रत्यधिदेवता सहिताय शनैश्चराय नमः ॥ ७ ॥

ओं, कया नश्चित्र आभुवदूती सदावृधस्सखा । कया शचिष्ठया वृता ॥ आयङ्गौः पृश्निरक्रमीदसनन्मातरं पुनः । पितरञ्च प्रयन्त्सुवः ॥ यत्ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविचर्त्यम् ॥ इदन्ते तद्विष्या-म्यायुषो न मध्यादथाजीवः पितुमद्धि प्रमुक्तः ॥ ओं, अधिदेवता-प्रत्यधिदेवता-सहिताय राहवे नमः ॥ ८ ॥

ओं, केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजा-यथाः ॥ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । श्येनो गृध्राणांगुंस्वधितिर्वनानागुंसोमः पवित्रमत्येति रेभन् ॥ सचित्रचित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम् । चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्रचन्द्राभिर्गृणते युवस्व ॥ ओं, अधिदेवता-प्रत्यधिदेवता-सहितेभ्यः केतुभ्यो नमः ॥

॥ ओ आदित्यादि नवग्रह-देवताभ्यो नमो नमः ॥

॥ नवग्रहनमस्कारमन्त्रपाठस्संपूर्णः ॥

# ॥ तैत्तिरीय यजुर्ब्राह्मणे काठक-भागः ॥

## प्रथमः प्रश्नः ॥

हरिः ओ (४) म् ॥

संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत्। संकल्पमानं प्रकल्पमान-मुपकल्पमान-मुपक्लृप्तं क्लृप्तम्। श्रेयो वसीय आयत्संभूतं भूतम्। चित्रः केतुः प्रभानाभान् संभान्। ज्योतिष्मागं स्तेजस्वानातपगं स्तपन्नभितपन्। रोचनो रोचमानश्शोभनश्शोभमानः कल्याणः। दर्शा दृष्टा दर्शता विश्वरूपा सुदर्शना। आप्यायमाना-प्यायमानाप्याया सूनृतेरा। आपूर्यमाणा पूर्यमाणा पूरयन्ती पूर्णा पौर्णमासी। दाता प्रदातानन्दो मोदः प्रमोदः ॥ १-१ ॥ आवेशय - न्निवेशयन् संवेशनस्सगं शान्तश्शान्तः। आभवन् प्रभवन् संभवन् संभूतो भूतः। प्रस्तुतं विष्टुतगं सगंस्तुतं कल्याणं विश्वरूपम्। शुक्रममृतं तेजस्वि तेजस्समिद्धम्। अरुणं भानुमन्मरीचिमदभितप - त्तपस्वत्। सविता प्रसविता दीप्तो दीपयन्दीप्यमानः। ज्वलन् ज्वलिता तपन् वितपन्

सन्तपन् । रोचनो रोचमानश्शोभनश्शोभमानो वामः । सुता सुन्वती प्रसुता सूयमाना ऽभिषूयमाणा । पीती प्रपासं पातृप्तिस्तर्पयन्ती ॥१-२॥ कान्ता काम्या कामजाताऽऽयुष्मती कामदुघा । अभिशास्तानुमन्तानन्दो मोदः प्रमोदः । आसादयन्निषादयन् सगंसादन-स्सगंसन्न-स्सन्नः । आभूर्विभूः प्रभूश्शंभूर्भुवः । पवित्रं पवयिष्यन् पूतो मेध्यः । यशो यशस्वानायु - रमृतः । जीवो जीविष्यन् स्वर्गो लोकः । सहस्वान् सहीयानोजस्वान् सहमानः । जयन्नभिजयन् सुद्रविणो द्रविणोदाः । आर्द्रपवित्रो हरिकेशो मोदः प्रमोदः । १-३ ॥ अरुणोऽरुणरजाः पुण्डरीको विश्वजिदभिजित् । आर्द्रः पिन्वमानोऽन्नवान् रसवा-निरावान् । सर्वौषधस्संभरो महस्वान् । एजत्काजोवत्काः । क्षुल्ल-काशिपिविष्टकाः । सरिस्त्ररास्सुशेरवः । अजिरासोगमिष्णवः । इदानीं तदानी-मेतर्हि क्षिप्रमजिरम् । आशुर्निमेषः फणो द्रवन्नतिद्रवन् । त्वरग्ं स्त्वरमाण आशुराशीयाञ्जवः । अग्निष्टोम उक्थ्योऽतिरात्रो-द्विरात्र-स्त्रिरात्र-श्चतूरात्रः । अग्नि-र्ऋतुस्सूर्य ऋतु-श्चन्द्रमा ऋतुः । प्रजापति-स्संवत्सरो महान् कः ॥ १-४ ॥ १ ॥

भूरग्निं च पृथिवीं च मां च। त्रीगंश्च लोकान् संवत्सरं च। प्रजापतिस्त्वा सादयतु। तया देवतया ऽङ्गिरस्व ध्रुवासीद। भुवो वायुं चान्तरिक्षंच मां च। त्रीगंश्च लोकान् संवत्सरं च। प्रजापतिस्त्वा सादयतु। तया देवतया ऽङ्गिरस्व ध्रुवासीद। स्वरादित्यं च दिवं च मां च। त्रीगंश्च लोकान् संवत्सरं च। प्रजापतिस्त्वा सादयतु। तया देवतया ऽङ्गिरस्व ध्रुवासीद। भूर्भुवस्स्वश्चन्द्रमसं च दिशश्च मां च। त्रीगंश्च लोकान् संवत्सरं च। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गीरस्व ध्रुवासीद ॥ २ ॥

त्वमेव त्वां वेत्थ योऽसि सोऽसि। त्वमेव त्वामचैषीः। चितश्चासि संचितश्चास्यग्ने। एतावागंश्चासि भूयागंश्चास्यग्ने। यत्ते अग्ने न्यूनं यदु तेऽतिरिक्तम्। आदित्यास्तदंगिरसश्चिन्वन्तु। विश्वे ते देवाश्चितिमापूरयन्तु। चितश्चासि संचितश्चास्यग्ने। एतावागंश्चासि भूयागंश्चास्यग्ने। मा ते अग्ने च येन मा ऽति चयेनायुरावृक्षि। सर्वेषां ज्योतिषां ज्योति-र्यद-दावुदेति। तपसो जात-मनिभृष्ट-मोजः। तत्ते ज्योति-रिष्टके। तेन मे

तप । तेन मे ज्वल । तेन मे दीदिहि । यावद्देवाः । यावदसाति सूर्यः । यावदुतापि ब्रह्म ॥ ३ ॥

संवत्सरोऽसि परिवत्सरोऽसि । इदावत्सरोऽसीदुवत्सरोऽसि । इद्वत्सरोऽसि वत्सरोऽसि । तस्य ते वसन्तश्शिरः । ग्रीष्मो दक्षिणः पक्षः । वर्षाः पुच्छम् । शरदुत्तरः पक्षः । हेमन्तो मध्यम् । पूर्वपक्षाश्चितयः । अपरपक्षाः पुरीषम् ॥ ४·१ ॥ अहोरात्रीणीष्टकाः । ऋषभोऽसि स्वर्गो लोकः । यस्यां दिशि महीयसे । ततो नो मह आवह । वायुर्भूत्वा सर्वा दिश आवाहि । सर्वा दिशोऽनु विवाहि । सर्वा दिशोऽनु संवाहि । चित्या चिति-मापृण । अचित्या चिति-मापृण । चिदसि समुद्रयोनिः ॥ ४·२ ॥ इन्दु-र्दक्षः श्येन ऋतावा । हिरण्यपक्षः शकुनो भुरण्युः । महान् सधस्थे ध्रुव आनिषत्तः । नमस्ते अस्तु मा मा हिंसीः । एति प्रेति वीति समित्युदिति । दिवं मे यच्छ । अन्तरिक्षं मे यच्छ । पृथिवीं मे यच्छ । पृथिवीं मे यच्छ । अन्तरिक्षं मे यच्छ । दिवं मे यच्छ । अह्ना प्रसारय । रात्र्या समंच । रात्र्या प्रसारय । अह्ना समंच । कामं प्रसारय । कामगं समंच ॥ ४·३ ॥

भूर्भुवस्स्वः। ओजो बलम्। ब्रह्मक्षत्रम्। यशोमहत्। सत्यं तपो नाम। रूप-ममृतम्। चक्षुः श्रोत्रम्। मन आयुः। विश्वं यशो महः। समं तपो हरो भाः। जातवेदा यदि वा पावकोऽसि। वैश्वानरो यदि वा वैद्युतोऽसि। शं प्रजाभ्यो यजमानाय लोकम्। ऊर्जं पुष्टिं दद-दभ्यावंवृतस्व ॥ ५ ॥

राज्ञी विराज्ञी। संराज्ञी स्वराज्ञी। अर्चिश्शोचिः। तपो हरो भाः। अग्निरिन्द्रो बृहस्पतिः। विश्वेदेवा भुवनस्य गोपाः। ते मा सर्वे यशसा सगंसृजन्तु ॥ ६ ॥

असवे स्वाहा वसवेस्वाहा। विभुवे स्वाहा विवस्वते स्वाहा। अभिभुवे स्वाहा ऽधिपतये स्वाहा। दिवांपतये स्वाहा ऽगंहस्पत्याय स्वाहा। चाक्षुष्मत्याय स्वाहा ज्योतिष्मत्याय स्वाहा। राज्ञे स्वाहा विराज्ञे स्वाहा। संराज्ञे स्वाहा स्वराज्ञे स्वाहा। शूषाय स्वाहा सूर्याय स्वाहा। चन्द्रमसे स्वाहा ज्योतिषे स्वाहा। संसर्पाय स्वाहा कल्याणाय स्वाहा। अर्जुनाय स्वाहा ॥ ७ ॥

विपश्चिते पवमानाय गायत। मही न धाराऽत्यन्धो अर्षति।

अहिर्हि जीर्णा-मतिसर्पति त्वचम् । अत्योनक्रीडन्नसरद्वृषाहरिः । उप-
यामगृहीतोऽसि मृत्यवे त्वा जुष्टं गृह्णामि । एष ते योनि-र्मृत्यवे त्वा ।
अपमृत्युमपक्षुधम् । अपेतश्शपथं जहि । अधानो अग्न आवह ।
रायस्पोषग्ं सहस्रिणम् ॥ ८·१ ॥

ये ते सहस्र-मयुतं पाशाः । मृत्यो मर्त्याय हन्तवे । तान्
यज्ञस्य मायया । सर्वानव यजामहे । भक्षोऽस्यमृतभक्षः । तस्य ते
मृत्युपीतस्यामृतवतः । स्वगाकृतस्य मधुमतः । उपहूतस्योपहूतो भक्षयामि ।
मन्द्राऽभिभूतिः केतुर्यज्ञानां वाक् । असावेहि ॥ ८·२ ॥ अन्धो
जागृविः प्राण । असावेहि । बधिर आक्रन्दयितरपान । असावेहि ।
अहस्तोस्त्वा चक्षुः । असावेहि । अपादाशोमनः । असावेहि ।
कवेविप्रचित्ते श्रोत्र । असावेहि ॥ ८·३ ॥ सुहस्तस्सुवासाः । शूषो
नामास्यमृतो मर्त्येषु । तं त्वाऽहंतथा वेद । असावेहि । अग्निर्मे वाचि
श्रितः । वाग्घृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । वायुर्मे
प्राणे श्रितः ॥ ८·४ ॥ प्राणो हृदये । हृदयं मयि । अहममृते ।

अमृतं ब्रह्मणि। सूर्यो मे चक्षुषि श्रितः। चक्षुर्हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। चन्द्रमा मे मनसि श्रितः ॥ ८·५ ॥ मनो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। दिशो मे श्रोत्रे श्रिताः। श्रोत्रगं हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। आपो मे रेतसि श्रिताः ॥ ८·६ ॥ रेतो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। पृथिवी मे शरीरे श्रिता। शरीरꣳ हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। ओषधिवनस्पतयो मे लोमसु श्रिताः ॥ ८·७ ॥ लोमानि हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। इन्द्रो मे बले श्रितः। बलगं हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। पर्जन्यो मे मूर्ध्नि श्रितः ॥८·८ ॥ मूर्धा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। ईशानो मे मन्यौ श्रितः। मन्युर्हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। आत्मा म आत्मनि श्रितः ॥ ८·९ ॥ आत्मा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। पुनर्म आत्मा पुनरायु-रागात्। पुनः प्राणः पुनराकूत-मागात्। वैश्वानरो

रश्मिभिर्वा वृधानः । अन्तस्तिष्ठत्वमृतस्य गोपाः ॥ ८.१० ॥ ८ ॥

[सहस्रिणं मिहि श्रोत्रासावेहि प्राणे श्रितो मनसि श्रितो रेतसि श्रिता लोमसु श्रिता मूर्ध्नि श्रित आत्मनि श्रितोऽष्टौ च ॥ अग्निर्वायु स्सूर्यश्चन्द्रमा दिश आपः पृथिव्योषधि-वनस्पतय इन्द्रः पर्जन्य ईशान आत्मा पुनर्मे त्रयोदश ॥]

प्रजापति - र्देवानसृजत । ते पाप्मना सन्दिता अजायन्त । तान्व्यद्यत् । यद्व्यद्यत् । तस्माद्विद्युत् । तमवृश्चत् । यदवृश्चत् । तस्माद्वृष्टिः । तस्माद्यत्रैते देवते अभिप्राप्नुतः । विचहैवास्य तत्र पाप्मानं द्यतः ॥ ९. १ ॥ वृश्चतश्च । सैषा मीमांसा ऽग्निहोत्र एव संपन्ना । अथो आहुः । सर्वेषु यज्ञक्रतुष्विति । होष्यन्नप उपस्पृशेत् । विद्युदसि विद्य मे पाप्मानमिति । अथ हुत्वोपस्पृशेत् । वृष्टिरसि वृश्च मे पाप्मानमिति । यक्ष्यमाणो वेष्टा वाँ । वि चहैवास्यैते देवते पाप्मानं द्यतः ॥ ९.२ ॥ वृश्चतश्च । अत्यंहो हारुणिः । ब्रह्मचारिणे प्रश्नान् प्रोच्य प्रजिघाय । परेहि । प्लक्षन्दैयांपातिं पृच्छ । वेत्थ सावित्रा (३) न वेत्था (३) इति । तमागत्य

पप्रच्छ। आचार्या माप्राहैषीन्। वेत्थं सावित्रा (३) न्न वेत्था (३) इति। सहोवाच वेदेति ॥ ९.३ ॥ स कस्मिन् प्रतिष्ठित इति। परोरजसीति। कस्तद्यत् परो रजा इति। एष वावस परो रजा इति होवाच। य एष तपति। एषोऽर्वाग्रजा इति। एकस्मिन्त्वेष इति। सत्य इति। किं तत्सत्यमिति। तप इति ॥ ९.४ ॥ कस्मिन्नु तप इति। बल इति। किं तद्बलमिति। प्राण इति। मास्म प्राण-मति पृच्छ इति माऽऽचार्योऽब्रवीदिति होवाच ब्रह्मचारी। सहोवाच प्लक्षोदैयां पातिः। यद्ध ब्रह्मचारिन् प्राण-मत्यप्रक्ष्यः। मूर्धा ते व्यपतिष्यत्। अहमुत आचार्याच्छ्रेयान् भविष्यामि। यो मा सावित्रे समवादिष्टेति ॥ ९.५ ॥ तस्मात्सावित्रे न संवदेत। स यो ह वै सावित्रं विदुषा सावित्रे संवदते। सहास्मिञ्छ्रियं दधाति। अनु ह वा अस्मा असौ तपञ्छ्रियं मन्यते। अन्वस्मै श्रीस्तपो मन्यते। अन्वस्मै तपो बलं मन्यते। अन्वस्मै बलं प्राणं मन्यते। स यदाह। संज्ञानं विज्ञानं दर्शं दृष्टेति। एष एव तत् ॥ ९.६ ॥ अथ यदाह। प्रस्तुतं विष्टुतगूं सुता सुन्वतीति। एष एव तत्। एष ह्येव तान्यहानि।

एष रात्रयः । अथ यदाह । चित्रः केतु-र्दाता प्रदाता सविता प्रसविताभिशास्तानुमन्तेति । एष एव तत् । एष ह्येव तेऽह्नो मुहूर्ताः । एष रात्रेः ॥ ९·७ ॥ अथ यदाह । पवित्रं पवयिष्यन् सहस्वान् सहीयानरुणो ऽरुणरजा इति । एष एव तत् । एष ह्येव ते ऽर्ध मासाः । एष मासाः । अथ यदाह । अग्निष्टोम उक्थ्यो ऽग्निर्ऋतुः प्रजापतिस्संवत्सर इति । एष एव तत् । एष ह्येव ते यज्ञ क्रतवः । एष ऋतवः ॥ ९·८ ॥ एष संवत्सरः । अथ यदाह । इदानीं तदानीमिति । एष एव तत् । एष ह्येव ते मुहूर्तानां मुहूर्ताः । जनको ह वैदेहः । अहो रात्रैस्समाजगाम । तगं होचुः । यो वा अस्मान् वेद । विजहत्पाप्मानमेति ॥ ९·९ ॥ सर्व-मायुरेति । अभिस्वर्गं लोकं जयति । नास्या मुष्मिन् लोकेऽन्नं क्षीयत इति । विजहद्धवै पाप्मानमेति । सर्वमायुरेति । अभिस्वर्गं लोकं जयति । नास्यामुष्मिन् लोकेऽन्नं क्षीयते । य एवं वेद । अहीनाहाश्वत्थ्यः । सावित्रं विदांचकार ॥९·१०॥ सह हगंसो हिरण्मयो भूत्वा । स्वर्गं लोकमियाय । आदित्यस्य सायुज्यम् । हगंसोहवै हिरण्मयो भूत्वा । स्वर्गं लोकमेति । आदित्यस्य

सायुज्यम्। य एवं वेद। देव भागो हँश्रौतर्षः। सावित्रं विदांचकार। तꣳ ह वागदृश्यमानऽभ्युवाच ॥ ९·११ ॥ सर्वं बत गौतमो वेद। यस्सावित्रं वेदेति। सहोवाच। कैषा वागसीति। अयमहꣳसावित्रः। देवाना - मुत्तमो लोकः। गुह्यं महो बिभ्रदिति। एतावतिह गौतमः। यज्ञोपवीतं कृत्वाऽधो निपपात। नमो नम इति ॥ ९·१२ ॥ सहोवाच। मा भैषीर्गौतम। जितो वै ते लोक इति। तस्माद्येके च सावित्रं विदुः। सर्वे ते जितलोकाः। स यो ह वै सावित्रस्या-ष्टाक्षरं पदꣳ श्रियाऽभिषिक्तं वेद। श्रियाहैवाभिषिच्यते। घृणिरिति द्वे अक्षरे। सूर्य इति त्रीणि। आदित्य इति त्रीणि ॥ ९·१३ ॥ एतद्वै सावित्रस्याष्टाक्षरं पदꣳ श्रियाऽभिषिक्तम्। य एवं वेद। श्रियाहैवाभिषिच्यते। तदेतदृचाभ्युक्तम्। ऋचो अक्षरे परमे व्योमन्। यस्मिन् देवा अधिविश्वेनिषेदुः। यस्तन्न वेद किमृचा करिष्यति। य इत्तद्विदुस्त इमे समासत इति। न ह वा एतस्यर्चा न यजुषा न साम्नार्थोऽस्ति। यस्सावित्रं वेद ॥ ९-१४ ॥ तदेतत्परि यद्वचक्रम्। आर्द्रं पिन्वमानꣳ स्वर्गे लोक एति। विजहद्विश्वाभूतानि

संपश्यत् । आर्द्रो ह वै पिन्वमानस्वर्गेलोक एति । विजहन्विश्वांभूतानि संपश्यन् । य एवं वेद । शूषो ह वै वार्ष्णेयः । आदित्येन समाजगाम । तꣳहोवाच । एहि सावित्रं विद्धि । अयं वै स्वर्ग्यो ऽग्निः पारयिष्णु-रमृतात्संभूत इति । एष वाव सावित्रः । य एष तपति । एहि मां विद्धि । इति हैवैनं तदुवाच ॥ ९-१५ ॥

[घतो घतो वेदेति तप इति समवादिष्टेति तद्राते ऋतवं एति चकारोवाच नम इत्यादित्य इति त्रीणि सावित्र वेद विद्धि पंच च ॥

संज्ञानं प्रस्तुतं तान्यहानि रात्रयश्चित्रः केतुस्ते ऽह्ना मुहूर्ता रात्रेः पवित्रं ते ऽर्धमासा अग्निष्टोमो यज्ञक्रतवं इदानीं मुहूर्तानां जनकोऽह्नीनादेवभागः कैषावाक्छूषोहवै ॥]

इयं वाव सरघा । तस्या अग्निरेव सारघं मधु । या एताः पूर्वपक्षापरपक्षयो रात्रयः । ता मधुकृतः । यान्यहानि । ते मधुवृषाः । स यो ह वा एता मधुकृतश्च मधुवृषागंश्च वेद । कुर्वन्ति हास्यै ता अग्नौ मधु । नास्येष्टापूर्तं धयन्ति । अथ यो न वेद ॥ १०·१ ॥ न हास्यैता अग्नौ मधु कुर्वन्ति । धयन्त्यस्येष्टापूर्तम् । यो ह वा

अहोरात्राणां नामधेयानि वेद । नाहोरात्रे-ष्वार्ति-मार्च्छति । संज्ञानं विज्ञानं दर्शा दृष्टेति । एतावनुवाकौ पूर्वपक्षस्याहोरात्राणां नामधेयानि । प्रस्तुतं विष्टुतगं सुता सुन्वतीति । एतावनुवाकावपरपक्षस्याहोरात्राणां नामधेयानि । नाहोरात्रेष्वार्ति-मार्च्छति । य एवं वेद ॥ १०·२ ॥ यो ह वै मुहूर्तानान्नामधेयानि वेद । न मुहूर्तेष्वार्ति-मार्च्छति । चित्रः केतु-र्दाता-प्रदाता सविता प्रसविताऽभिशास्ताऽनुमन्तेति । एतेऽनुवाका मुहूर्तानान्नामधेयानि । न मुहूर्तेष्वार्ति-मार्च्छति । य एवं वेद । योहवा अर्धमासानां च मासानां च नामधेयानि वेद । नार्धमासेषु न मासेष्वार्ति-मार्च्छति । पवित्रं पवयिष्यन् सहस्वान् सहीया-नरुणोऽरुणरजा इति । एतेऽनुवाका अर्धमासानां च मासानां च नामधेयानि ॥ १०·३ ॥ नार्धमासेषु न मासेष्वार्ति-मार्च्छति । य एवं वेद । यो ह वै यज्ञक्रतूनां चर्तूनां च संवत्सरस्य च नामधेयानि वेद । न यज्ञक्रतुषु नर्तुषु न संवत्सर आर्तिमार्च्छति । अग्निष्टोम उक्थ्योऽग्निर्ऋतुः प्रजापतिस्संवत्सर इति । एतेऽनुवाका यज्ञक्रतूनांचर्तूनां च संवत्सरस्य च नामधेयानि । न

यज्ञक्रतुषु नर्तुषु न संवत्सर आर्तिमार्च्छति । य एवं वेद । यो ह वै मुहूर्तानां मुहूर्तान् वेद । न मुहूर्तानां मुहूर्तेष्वार्ति-मार्च्छति ॥ १०·४॥ इदानीं तदानीमिति । एते वै मुहूर्तानां मुहूर्ताः । न मुहूर्तानां मुहूर्तेष्वार्ति-मार्च्छति । य एवं वेद । अथो यथा क्षेत्रज्ञो भूत्वाऽनुप्रविश्यान्नमत्ति । एवमेवैतान् क्षेत्रज्ञो भूत्वाऽनुप्रविश्यान्नमत्ति । स एतेषामेव संलोकतागं सायुज्यमश्नुते । अप पुनर्मृत्युं जयति । य एवं वेद ॥ १०·५॥

[सरघाऽहोरात्राणाꣳ संज्ञानं पूर्वपक्षस्य प्रस्तुत-मपरपक्षस्य मुहूर्तानां चित्रः केतु-रर्धमासानां पवित्रं यज्ञक्रतूना-मग्निष्टोमो मुहूर्तानां मुहूर्तान् वेदेदानीमथो यथा ॥] १० ॥

कश्चिद्धवा अस्माल्लोकात् प्रेत्य । आत्मानं वेद । अयमहम-स्मीति । कश्चित्स्वंलोकं न प्रतिप्रजानाति । अग्निमुग्धो हैव धूमतान्तः । स्वंलोकं न प्रति प्रजानाति । अथ यो है वैतमग्निगं सावित्रं वेद । स एवस्माल्लोकात्प्रेत्य । आत्मानं वेद । अयमहमस्मीति ॥ ११·१ ॥ स स्वंलोकं प्रति प्रजानाति । एष उवे वैनन्तत्सावित्रः । स्वर्गं लोक

मभिवंहति। अहो रात्रैर्वा इदगं सयुग्भिः क्रियते। इति रात्राया दीक्षिषत। इति रात्रायं व्रत-मुपागुरिति। तानि ह्यनेवं विदुर्षः। अमुष्मिं लोके शेवधिं धंयन्ति। धीतगं हैव स शेवधि-मनु-पैरैति। अथ यो हैवैतमग्निगं सावित्रं वेदं ॥ ११·२ ॥ तस्य-हैवाहोरात्राणि। अमुष्मिल्लोके शेवधिं न धंयन्ति। अधीतगं हैव स शेवधिमनुपरैति। भरद्वाजो ह त्रिभिरायुर्भि-र्ब्रह्मचर्य-मुवास। तगं ह जीर्णिगं स्थविरगं शयानम्। इन्द्र उपव्रज्योवाच। भरंद्वाज। यत्ते चतुर्थ-वायु-र्दद्याम् किमेनेन कुर्या इति। ब्रह्मचर्यमेवैनेन चरेयमिति होवाच ॥ ११·३ ॥ तगं ह त्रीन्गिरिरूपा न विज्ञातानिव दर्शयां चंकार। तेषागं हैकैकस्मान्मुष्टिनाऽऽददे। सहोवाच। भरंद्वाजेत्यामन्त्र्य। वेदा वा एते। अनन्ता वै वेदाः। एतद्वा एतै-स्त्रिभि रायुर्भि-रन्ववोचथाः अथ त इतरदननूक्तमेव। एहींयं विद्धि। अयं वै सर्वविद्येति ॥ ११·४ ॥ तस्मै हैतमग्निगं सावित्रमुवाच। तगं स विदित्वा। अमृतो भूत्वा। स्वर्गं लोकमियाय। आदित्यस्य सायु-

ज्यम् । अमृतोहैव भूत्वा । स्वर्गं लोकमेति । आदित्यस्य सायुज्यम् । य एवं वेद । एषो एव त्रयी विद्या ॥ ११.५ ॥ यावन्तगं ह वै त्रय्या विद्यया लोकं जयति । तावन्तं लोकं जयति । य एवं वेद । अग्नेर्वा एतानि नामधेयानि । अग्नेरेव सायुज्यगं सलोकता-माप्नोति । य एवं वेद । वायोर्वा एतानि नामधेयानि । वायोरेव सायुज्यगं सलोकता-माप्नोति । य एवं वेद । इन्द्रस्य वा एतानि नामधेयानि ॥ ११.६ ॥ इन्द्रस्यैव सायुज्यगं सलोकतामाप्नोति । य एवं वेद । बृहस्पतेर्वा एतानि नामधेयानि । बृहस्पतेरेव सायुज्यगं सलोकता-माप्नोति । य एवं वेद । प्रजापतेर्वा एतानि नामधेयानि । प्रजापतेरेव सायुज्यगं सलोकतामाप्नोति । य एवं वेद । ब्रह्मणो वा एतानि नामधेयानि । ब्रह्मण एव सायुज्यगं सलोकता-माप्नोति । य एवं वेद । स वा एषोऽग्निरपक्षपुच्छो वायुरेव । तस्याग्निर्मुखम् । असावादित्यश्शिरः । सयदेते देवते अन्तरेण । तत्सर्वगं सीव्यति । तस्मात्सावित्रः ॥ ११.७ ॥ ११

हरिः ओ(३)म्

इति तैत्तिरीय-यजुर्ब्राह्मणे काठके

प्रथमः प्रश्नः ॥

## ॥ द्वितीयः प्रश्नः ॥

हरिः ओ(४)म् ॥

लोकोऽसि स्वर्गोऽसि। अनन्तोऽस्यपारोऽसि। अक्षितोऽस्यक्षय्यो-ऽसि। तपसः प्रतिष्ठा। त्वयीदमन्तः। विश्वं यक्षं विश्वंभूतं विश्वग्ं सुभूतम्। विश्वस्य भर्ता विश्वस्य जनयिता। तन्त्वोपदधे कामदुघ-मक्षितम्। प्रजापति-स्त्वा सादयतु। तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १·१ ॥ तपोऽसि लोकेश्रितम्। तेजसः प्रतिष्ठा। त्वयीदमन्तः। विश्वं यक्षं विश्वंभूतं विश्वग्ँ सुभूतम्। विश्वस्य भर्तृ विश्वस्य जनयितृ। तत्त्वोपदधे काम-दुघमक्षितम्। प्रजापति - स्त्वा सादयतु। तया देवतयाऽङ्गिरस्व ध्रुवासीद ॥ १·२ ॥ तेजोसि तपसि श्रितम्। समुद्रस्य प्रतिष्ठा। त्वयीदमन्तः। विश्वं यक्षं विश्वं भूतं विश्वग्ं सुभूतम्। विश्वस्य भर्तृ विश्वस्य जनयितृ। तत्त्वोपदधे कामदुघमक्षितम्। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १·३ ॥ समुद्रोऽसि तेजसि श्रितः। अपां प्रतिष्ठा। त्वयीदमन्तः। विश्वं यक्षं विश्वं भूतं विश्वग्ं सुभूतम्। विश्वस्य भर्ता विश्वस्य जनयिता। तन्त्वोपदधे

कामदुघमक्षितम् । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्व-
ध्रुवासीद ॥ १·४ ॥ आपस्स्थ समुद्रे श्रिताः । पृथिव्याः प्रतिष्ठा
युष्मासु । इदमन्तः । विश्वं यक्षं विश्वं भूतं विश्वगं सुभूतम् ।
विश्वस्य भर्त्र्यो विश्वस्य जनयित्र्यः । ताव उपदधे कामदुघा अक्षिताः ।
प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्व ध्रुवासीद ॥ १·५ ॥
पृथिव्यस्यप्सु श्रिता । अग्नेः प्रतिष्ठा । त्वयीदमन्तः । विश्वं यक्षं
विश्वंभूतं विश्वगं सुभूतम् । विश्वस्य भर्त्री विश्वस्य जनयित्री । तांत्वोपदधे
कामदुघामक्षिताम् । प्रजापतिस्त्वासादयतु । तया देवतयाऽङ्गिरस्वध्रुवा-
सीद ॥ १·६ ॥ अग्निरसि पृथिव्यागं श्रितः । अन्तरिक्षस्य प्रतिष्ठा ।
त्वयीदमन्तः । विश्वं यक्षं विश्वं भूतं विश्वगं सुभूतम् । विश्वस्य भर्ता विश्वस्य
जनयिता । तं त्वोपदधे कामदुघमक्षितम् । प्रजापतिस्त्वा सादयतु ।
तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १·७ ॥ अन्तरिक्षमस्यग्नौ श्रितम् ।
वायोः प्रतिष्ठा । त्वयीदमन्तः । विश्वं यक्षं विश्वं भूतं विश्वगं
सुभूतम् । विश्वस्य भर्तृ विश्वस्य जनयितृ । तत्त्वोपदधे कामदुघ-
मक्षितम् । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्व-

ध्रुवासीद ॥ १·८ ॥ वायुरस्यन्तरिक्षे श्रितः । दिवः प्रतिष्ठा । त्वयीदमन्तः । विश्वं यक्षं विश्वं भूतं विश्वगुं सुभूतम् । विश्वस्य भर्ता विश्वस्य जनयिता । तंत्वोपदधे कामदुघमक्षितम् । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १·९ ॥ द्यौरसि वायौ श्रिता । आदित्यस्य प्रतिष्ठा । त्वयीदमन्तः । विश्वं यक्षं विश्वं भूतं विश्वगुं सुभूतम् । विश्वस्य भर्त्री विश्वस्य जनयित्री । तांत्वोपदधे कामदुघामक्षिताम् । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १·१० ॥ आदित्योसि दिवि श्रितः । चन्द्रमसः प्रतिष्ठा । त्वयीदमन्तः । विश्वं यक्षं विश्वं भूतं विश्वगुं सुभूतम् । विश्वस्य भर्ता विश्वस्य जनयिता । तंत्वोपदधे कामदुघमक्षितम् । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १·११ ॥ चन्द्रमा अस्यादित्ये श्रितः । नक्षत्राणां प्रतिष्ठा । त्वयीदमन्तः । विश्वं यक्षं विश्वंभूतं विश्वगुं सुभूतम् । विश्वस्य भर्ता विश्वस्य जनयिता । तन्त्वोपधे कामदुघमक्षितम् । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वध्रुवासीद ॥१·१२॥ नक्षत्राणिस्थ चन्द्रमसि श्रितानि । संवत्सरस्य प्रतिष्ठा युष्मासु ।

इदमन्तः। विश्वं यक्षं विश्वं भूतं विश्वग्ं सुभूतम्। विश्वस्य भर्तॄणि विश्वस्य जनयितॄणि। तानिव उपदधे कामदुघान्यक्षितानि। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १·१३ ॥ संवत्सरोऽसि नक्षत्रेषु श्रितः ऋतूनां प्रतिष्ठा। त्वयीदमन्तः। विश्वं यक्षं विश्वं भूतं विश्वग्ं सुभूतम्। विश्वस्य भर्ता विश्वस्य जनयिता। तंत्वोपदधे कामदुघमक्षितम्। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १·१४ ॥ ऋतवस्स्थ संवत्सरे श्रिताः। मासानां प्रतिष्ठा युष्मासु। इदमन्तः। विश्वंयक्षं विश्वंभूतं विश्वग्ं सुभूतम्। विश्वस्य भर्तारो विश्वस्य जनयितारः। तान् व उपदधे कामदुघानक्षितान्। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्व ध्रुवासीद ॥ १·१५ ॥ मासास्स्थर्तुषु श्रिताः। अर्धमासानां प्रतिष्ठा युष्मासु। इदमन्तः। विश्वं यक्षं विश्वं भूतं विश्वग्ं सुभूतम्। विश्वस्य भर्तारो विश्वस्य जनयितारः। तान् व उपदधे कामदुघानक्षितान्। प्रजापतिस्त्वा सादयतु। तया देवतया-ऽङ्गिरस्वध्रुवासीद ॥ १·१६ ॥ अर्धमासास्स्थमासु श्रिताः। अहोरात्रयोः प्रतिष्ठा युष्मासु। इदमन्तः। विश्वं यक्षं विश्वंभूतं विश्वग्ं सुभूतम्।

विश्वस्य भर्तारो विश्वस्य जनयितारः। तान् व उपदधे कामदुघानक्षितान्। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्व ध्रुवासीद ॥ १·१७ ॥ अहोरात्रेस्थाऽर्धमासेषु श्रिते। भूतस्य प्रतिष्ठे भवस्य प्रतिष्ठे। युवयोरिदमन्तः। विश्वं यक्षं विश्वंभूतं विश्वगुं सुभूतम्। विश्वस्य भर्त्र्यौ विश्वस्य जनयित्र्यौ। ते वा-मुपदधे कामदुघेऽक्षिते। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्वध्रुवासीद ॥१·१८॥ पौर्णमास्यष्टकाऽमावास्या। अन्नादास्स्थान्नदुघो युष्मासु। इदमन्तः। विश्वं यक्षं विश्वं भूतम् विश्वगुं सुभूतम्। विश्वस्य भर्त्र्यो विश्वस्य जनयित्र्यः। ताव उपदधे कामदुघा अक्षिताः। प्रजापतिस्त्वासादयतु। तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १·१९ ॥ राडसि बृहती श्रीरसीन्द्रपत्नी धर्मपत्नी। विश्वं भूतमनुप्रभूता। त्वयीदमन्तः। विश्वंयक्षं विश्वंभूतं विश्वगुं सुभूतम्। विश्वस्य भर्त्री विश्वस्य जनयित्री। तां त्वोपदधे कामदुघामक्षिताम्। प्रजापतिस्त्वासादयतु। तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १·२० ॥ ओजोऽसि सहोऽसि। बलमसि भ्राजोऽसि। देवानां धामामृतम्। अमर्त्यस्तपोजाः। त्वयीदमन्तः। विश्वंयक्षं विश्वंभूतम् विश्वगुं सुभूतम्।

विश्वस्य भर्ता विश्वस्य जनयिता । तंत्वोपदधे कामदुघमक्षितम् । प्रजापतिस्त्वासादयतु । तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १·२१ ॥

[लोकस्तपस्तेज-स्समुद्र-आपः पृथिव्यग्निरन्तरिक्ष-वायुर्द्यौ-रादित्यश्चन्द्रमा-नक्षत्राणि संवत्सर ऋतवो मासा अर्धमासा अहोरात्रे पौर्णमासी-राडस्योजो ऽस्येकविंगूंशतिः ॥

लोकोऽसि भर्ता तम् । तपस्तेजोऽसि भर्तृ तत् । समुद्रोऽसि भर्ता तम् । आपस्स्थ भर्त्र्यस्तावः । पृथिवी भर्त्री ताम् । अग्निरसि भर्ता तम् । अन्तरिक्षं भर्तृ तत् । वायुरसि भर्ता तम् । द्यौरसि भर्त्री ताम् । आदित्यश्चन्द्रमा भर्ता तम् । नक्षत्राणिस्थ भर्तृणि तानि वः । संवत्सरोऽसि भर्ता तम् । ऋतवो मासा अर्धमासा भर्तारो भर्तारो भर्तारस्तान् वः । अहोरात्रे भर्त्र्यौ ते वाम् । पौर्णमासी भर्त्र्यस्तावः । राडसि भर्त्रीताम् । ओजोऽसि भर्ता तमेकविंगशतिः ॥] १ ॥

त्वमग्ने रुद्रो असुरो महो दिवः । त्वगूं शर्धो मारुतं पृक्ष ईशिषे । त्वं वातै-ररुणै-र्यासि शंगयः । त्वं पूषा विधतः पासि

नुत्मना । देवा देवेषु श्रयध्वम् । प्रथमा द्वितीयेषु श्रयध्वम् । द्वितीयास्तृतीयेषु श्रयध्वम् । तृतीयाश्चतुर्थेषु श्रयध्वम् । चतुर्थाः पंचमेषु श्रयध्वम् । पंचमाष्षष्ठेषु श्रयध्वम् ॥ २·१ ॥ षष्ठाः सप्तमेषु श्रयध्वम् । सप्तमा अष्टमेषु श्रयध्वम् । अष्टमा नवमेषु श्रयध्वम् । नवमा दशमेषु श्रयध्वम् । दशमा एकादशेषु श्रयध्वम् । एकादशा द्वादशेषु श्रयध्वम् । द्वादशास्त्रयोदशेषु श्रयध्वम् । त्रयोदशाश्चतुर्दशेषु श्रयध्वम् । चतुर्दशाः पंचदशेषु श्रयध्वम् । पंचदशाष्षोडशेषु श्रयध्वम् ॥ २·२ ॥ षोडशास्सप्तदशेषु श्रयध्वम् । सप्तदशा अष्टादशेषु श्रयध्वम् । अष्टादशा एकान्नविंशेषु श्रयध्वम् । एकान्नविंशा विंशेषु श्रयध्वम् । विंशा एकविंशेषु श्रयध्वम् । एकविंशा द्वाविंशेषु श्रयध्वम् । द्वाविंशास्त्रयोविंशेषु श्रयध्वम् । त्रयोविंशा - श्चतुर्विंशेषु श्रयध्वम् । चतुर्विंशाः पंचविंशेत्रं श्रयध्वम् पंचविंशाष्षड्विंशेषु श्रयध्वम् ॥ २·३ ॥ षड्विंशास्सप्तविंशेषु श्रयध्वम् । सप्तविंशा अष्टाविंशेषु श्रयध्वम् । अष्टाविंशा एकान्नत्रिंशेषु श्रयध्वम् । एकान्नत्रिंशास्त्रिंशेषु श्रयध्वम् । त्रिंशा एकत्रिंशेषु श्रयध्वम् । एकत्रिंशा द्वात्रिंशेषु

श्रयध्वम् । द्वात्रिगंशास्त्रयस्त्रिगंशेषु श्रयध्वम् । देवास्त्रिरेकादशास्त्रिस्त्र-यस्त्रिंशाः । उत्तरे भवत । उत्तरवर्त्मान उत्तरसत्त्वानः । यत्काम इदं जुहोमि । तन्मे समृध्यताम् । वयगं स्याम पतयो रयीणाम् । भूर्भुवस्स्वः स्वाहा ॥ २.४ ॥ २ ॥

अग्नाविष्णूसजोषसा । इमा वर्धन्तु वां गिरः । द्युम्नै - र्वाजेभि-रागतम् । राज्ञी विराज्ञी । संराज्ञी स्वराज्ञी । अर्चिश्शोचिः । तपोहरो भाः । अग्निस्सोमो बृहस्पतिः । विश्वेदेवा भुवनस्य गोपाः । ते सर्वे संगत्य । इदं मे प्रावता वचः । वयगंस्याम पतया रयीणाम् । भूर्भुवस्स्वः स्वाहा ॥ ३ ॥

अन्नपते ऽन्नस्य नो देहि । अनमीवस्य शुष्मिणः । प्रप्रदा-तारन्तारिषः । ऊर्जन्नो धेहि द्विपदे चतुष्पदे । अग्ने पृथिवीपते । सोम वीरुधांपते । त्वष्टस्समिधांपते । विष्णवाशानांपते । मित्र सत्यानां पते । वरुण धर्माणां पते ॥ ४.१ ॥ मरुतो गणानां पतयः । रुद्र पशूनां पते । इन्द्रौजसां पते । बृहस्पते ब्रह्मणस्पते । आरुचारोचेऽहगं स्वयम् । रुचा रुरुचे रोचमानः । अतीत्यादस्वराभरेह । तस्मिन् योनौ

जनौ प्रजायेय। वयगं स्याम पतयो रयीणाम्। भूर्भुवस्स्वः स्वाहा ॥ ४.२ ॥ ४ ॥

सप्त ते अग्ने समिधस्सप्तजिह्वाः। सप्त ऋषयः सप्तधाम प्रियाणि। सप्त होत्रां अनुविद्वान्। सप्तयोनीरापृणस्वा घृतेन। प्राचीदिक्। अग्निर्देवता। अग्निगं सदिशां देवं देवतानामृच्छतु। योमैतस्यै दिशोऽभिदासति। दक्षिणा दिक्। इन्द्रोदेवता ॥ ५·१ ॥ इन्द्रगं सदिशां देवं देवतानामृच्छतु। योमैतस्यै दिशोऽभिदासति। प्रतीचीदिक्। सोमो देवता। सोमगं सदिशां देवं देवतानामृच्छतु। योमैतस्यै दिशोऽभिदासति। उदीची दिक्। मित्रावरुणौ देवता। मित्रावरुणौ स दिशां देवौ देवतानामृच्छतु। यो मैतस्यै दिशोऽभिदासति ॥ ५·२ ॥ ऊर्ध्वा दिक्। बृहस्पति-र्देवता। बृहस्पतिगं सदिशां देवं देवतानामृच्छतु। योमैतस्यै दिशोऽभिदासति। इयं दिक्। अदितिर्देवता। अदितिगं सदिशां देवीं देवतानामृच्छतु। योमैतस्यै दिशोऽभिदासति। पुरुषो दिक्। पुरुषो मे कामान् समर्धयतु ॥ ५.३ ॥ अन्वो जागृविः प्राण। असावेहि। बधिर आक्रन्दयितरपान। असावेहि। उपसमुष-

समशीय। अहमसोज्योतिरशीय। अहमसोऽपोऽशीय। वयगं स्याम पतयो रयीणाम्। भूर्भुवस्स्वः स्वाहा ॥ ५.४ ॥

[दक्षिणां दिगिन्द्रो देवता मित्रावरुणौ सदिशां देवौ देवताना-मृच्छतु यो मैतस्यै दिशोऽभिदासत्यर्धयतु नव च ॥] ५ ॥

यत्तेऽचितं यदुचितं ते अग्ने। यत्त ऊनं यदुतेऽतिरिक्तम्। आदित्यास्तदङ्गिरस-श्चिन्वन्तु। विश्वे ते देवाश्चितिमापूरयन्तु। चितश्चासि संचितश्चास्यग्ने। एतावागंश्चासि भूयागंश्चास्यग्ने। लोकं पृणच्छिद्रं पृण। अथोऽसीदशिवात्वम्। इन्द्राग्नी त्वा बृहस्पतिः। अस्मिन् योनावसीषदन् ॥ ६.१ ॥ तया देवतयाऽङ्गिरस्वध्रुवासीद। ता अस्य सूददोहसः। सोमगं श्रीणन्ति पृश्नयः। जन्मन्देवानां विशः। त्रिष्वारोचने दिवः। तया देवतयाऽङ्गिरस्वध्रुवासीद। आग्ने देवागं इहावह। जज्ञानोवृक्त बर्हिषे। असि होतान ईड्यः। अगन्म महामनसायविष्ठम् ॥ ६.२ ॥ योदीदाय समिद्धस्स्वेदुरोणे। चित्रभानू रोदसी अन्तरुर्वी। स्वाहुतं विश्वतः प्रत्यञ्चम्। मेधाकारं विदथस्य प्रसाधनम्। अग्निगं होतारं

परिभूतमं मतिम् । त्वामभस्य हविषं स्समानमित् । त्वां महो वृणते नरो नान्यं त्वत् । मनुष्वत्वानि धीमहि । मनुष्वत्समिधीमहि । अग्ने मनुष्वदंगिरः ॥ ६.३ ॥ देवान् देवायते यंज । अग्निर्हि वाजिनं विशे । ददांति विश्वचंर्षणिः । अग्नीराये स्वाभुवम् । स प्रीतो याति वार्यम् । इषगुं स्तोतृभ्य आभर । पृष्टो दिवि पृष्टो अग्निः पृथिव्याम् । पृष्टो विश्वा ओषधीराविवेश । वैश्वानरस्सहसा पृष्टो अग्निः । सनो दिवा सरिषः पातु नक्तम् ॥ ६.४ ॥ ॥ ६ ॥

अयं वा वयः पवते । सोऽग्निर्नाचिकेतः । स यत्प्राङ् पवते । तदस्य शिरः । अथ यद्दक्षिणा । स दक्षिणः पक्षः । अथ यत्प्रत्यक् । तत्पुच्छम् । यदुदङ् । स उत्तरः पक्षः ॥ ७. १ ॥ अथ यत्संवाति । तदस्य समंचनं च प्रसारणं च । अथो संपदेवास्य सा । सगुं हवा अस्मै सकामः पद्यते । यत्कामो यजते । योऽग्निं नाचिकेतं चिनुते । य उचैनमेवं वेद । यो ह वा अग्नेर्नाचिकेतस्यायतनं प्रतिष्ठां वेद । आयतनवान् भवति । गच्छति प्रतिष्ठाम् ॥ ७. २ ॥ हिरण्यं वा अग्नेर्नाचिकेतस्यायतनं प्रतिष्ठा । य एवं वेद । आयतनवान् भवति ।

गच्छति प्रतिष्ठाम्। यो ह वा अग्नेर्नाचिकेतस्य शरीरं वेद। स शरीर एव स्वर्गं लोकमेति। हिरण्यं वा अग्नेर्नाचिकेतस्य शरीरम्। य एवं वेद। स शरीर एव स्वर्गं लोकमेति। अथो यथा रुक्म उत्तप्तो भाय्यात् ॥ ७. ३ ॥ एवमेव स तेजसा यशसा। अस्मिगंश्च लोकेऽमुष्मिगंश्च भाति। उरवो ह वै नामैते लोकाः। येऽवरेणादित्यम्। अथ हैते वरीयागंसो लोकाः। ये परेणादित्यम्। अन्तवन्तगं ह वा एष क्षय्यं लोकं जयति। योऽवरेणादित्यम्। अथ हैषोऽनन्त-मपार-मक्षय्यं लोकं जयति। यः परेणादित्यम् ॥ ७. ४ ॥ अनन्तगं ह वा अपारमक्षय्यं लोकं जयति। योऽग्निं नाचिकेतं चिनुते। य उ चैन-मेवं वेद। अथो यथा रथे तिष्ठन् पक्षसी पर्यावर्तमाने प्रत्यपेक्षते। एवमहोरात्रे प्रत्यपेक्षते। नास्याहोरात्रे लोकमाप्नुतः। योऽग्निं नाचिकेतं चिनुते। य उ चैनमेवं वेद ॥ ७. ५ ॥ ७ ॥

उशन् ह वै वाजश्रवसस्सर्ववेदसं ददौ। तस्य ह नचिकेता नाम पुत्र आस। तगं ह कुमारगं सन्तम्। दक्षिणासु नीयमानासु श्रद्धाऽऽविवेश। स होवाच। तत कस्मै मां दास्यसीति। द्वितीयं

तृतीयम् । तगं ह परीत उवाच । मृत्यवे त्वा ददामीति । तगं ह्स्मोत्थितं वागभिवदति ॥ ८. १ ॥ गौतमकुमारमिति । स होवाच । परेहि मृत्योर्गृहान् । मृत्यवे वै त्वाऽदामिति । तं वै प्रवसन्तं गन्तासीति होवाच । तस्य स्म तिस्रो रात्रीरनाश्वान् गृहे वसतात् । स यदि त्वा पृच्छेत् । कुमार कति रात्री-रवात्सीरिति । तिस्र इति प्रतिब्रूतात् । किं प्रथमागं रात्रि-माश्ना इति ॥ ८. २ ॥ प्रजान्त इति । किं द्वितीयामिति । पशूगं स्त इति । किं तृतीयामिति । साधुकृत्यान्त इति । तं वै प्रवसन्तं जगाम । तस्य ह तिस्रो रात्री रनाश्वान् गृह उवास । तमागत्य पप्रच्छ । कुमार कति रात्री-रवात्सीरिति । तिस्र इति प्रत्युवाच ॥ ८·३ ॥ किं प्रथमागं रात्रि-माश्ना इति । प्रजान्त इति । किं द्वितीयामिति । पशूगंस्त इति । किं तृतीयामिति । साधुकृत्यान्त इति । नमस्ते अस्तु भगव इति होवाच । वरं वृणीष्वेति । पितरमेव जीवन्नयानीति । द्वितीयं वृणीष्वेति ॥ ८·४ ॥ इष्टापूर्तयो-र्मेऽक्षितिं ब्रूहीति होवाच । तस्मै हैत-मग्निं नाचिकेत-मुवाच । ततो वै तस्येष्टापूर्ते नाक्षीयेते । नास्येष्टापूर्ते क्षीयेते । योऽग्निं नाचिकेतं

चिनुते। य उंचैनमेवं वेद। तृतीयं वृणीष्वेति। पुनर्मृत्योर्मेऽपजितिं ब्रूहीति होवाच। तस्मै हैतमग्निं नाचिकेत-मुवाच। ततो वै सोऽपपुनर्मृत्यु-मजयत्॥ ८.५॥ अप पुन-र्मृत्युं जयति। योऽग्निं नाचिकेतं चिनुते। य उंचैनमेवं वेद। प्रजापतिर्वै प्रजाकाम-स्तपोऽतप्यत। स हिरण्य-मुदास्यत्। तदग्नौ प्रास्यत्। तदस्मै नाच्छदयत्। तद्द्वितीयं प्रास्यत्। तदस्मै नैवाच्छदयत्। तत्तृतीयं प्रास्यत् ॥ ८.६ ॥ तदस्मै नैवाच्छदयत्। तदात्मन्नेव हृदय्येऽग्नौ वैश्वानरे प्रास्यत्। तदस्मा अच्छदयत्। तस्माद्धिरण्यं कनिष्ठं धनानाम्। भुंजत्प्रियतमम्। हृदयजगुंहि। सवैतमेव नाविन्दत्। यस्मै तां दक्षिणामनेष्यत्। तागुं स्वायैव हस्ताय दक्षिणायानयत्। तां प्रत्यगृह्णात् ॥ ८.७ ॥ दक्षाय त्वा दक्षिणां प्रतिगृह्णामीति। सोऽदक्षत दक्षिणां प्रतिगृह्य। दक्षते ह वै दक्षिणां प्रतिगृह्य। य एवं वेद। एतद्ध स्म वै तद्विद्वागुंसो वाजश्रवसा गोतमाः। अप्यनूदेश्यां दक्षिणां प्रतिगृह्णन्ति। उभये न वयं दक्षिष्यामह एव दक्षिणां प्रतिगृह्येति। तेऽदक्षन्त दक्षिणां

प्रतिगृह्य। दक्षते ह वै दक्षिणां प्रतिगृह्य। य एवं वेद। प्रहान्वं व्लीनाति ॥ ८.८ ॥ ८ ॥

तगं हैतमेके पशुबन्ध एवोत्तरवेद्यां चिन्वते। उत्तरवेदिसंमित एषोऽग्निरिति वदन्तः। तन्न तथा कुर्यात्। एतमग्निं कामेन व्यर्धयेत्। स एनं कामेन व्यृद्धः। कामेन व्यर्धयेत्। सौम्ये वा वैनमध्वरे चिन्वीत। यत्र वा भूयिष्ठा आहुतयो हूयेरन्। एतमग्निं कामेन समर्धयति। स एनं कामेन समृद्धः ॥ ९.१ ॥ कामेन समर्द्धयति। अथ हैनं पुरऋषयः। उत्तरवेद्यामेव सत्रियमचिन्वत। ततो वै ते ऽविन्दन्त प्रजाम्। अभि स्वर्गं लोकमजयन्। विन्दत एव प्रजाम्। अभि स्वर्गं लोकं जयति। योऽग्निं नाचिकेतं चिनुते। य उ चैनमेवं वेद। अथ हैनं वायुर्ऋद्धिकामः ॥ ९.२ ॥ यथा न्युप्तमेवोपदधे। ततो वै स एतामृद्धिमार्ध्नोत्। यामिदं वायुर्ऋद्धः। एतामृद्धिमृध्नोति। यामिदं वायुर्ऋद्धः। योऽग्निं नाचिकेतं चिनुते। य उ चैनमेवं वेद। अथ हैनं गोबलो वार्ष्णः पशुकामः। पांक्तमेव चिक्ये। पंच पुरस्तात् ॥ ९.३ ॥

पंच दक्षिणतः । पंच पश्चात । पंचोत्तरतः । एकां मध्ये । ततो वै सहस्रं पशून् प्राप्नोत् । प्रसहस्रं पशूनाप्नोति । योऽग्निं नाचिकेतं चिनुते । य उ चैनमेवं वेद । अथ हैनं प्रजापति-र्ज्यैष्ठ्यकामो यशस्कामः प्रजननकामः । त्रिवृतमेव चिक्ये ॥ ९.४ ॥ सप्त पुरस्तात् । तिस्रो दक्षिणतः । सप्त पश्चात् । तिस्र उत्तरतः । एकां मध्ये । ततो वै सप्रयशो ज्यैष्ठ्यमाप्नोत् । एतां प्रजातिं प्राजायत । यामिदं प्रजाः प्रजायन्ते । त्रिवृद्वै ज्यैष्ठ्यम् । माता-पिता-पुत्रः ॥ ९.५ ॥ त्रिवृत्प्रजननम् । उपस्थो योनिर्मध्यमा । प्रयशो ज्यैष्ठ्य-माप्नोति । एतां जातिं प्रजायते । यामिदं प्रजाः प्रजायन्ते । योऽग्निं नाचिकेतं चिनुते । य उ चैनमेवं वेद । अथ हैनमिन्द्रो ज्यैष्ठ्यकामः ऊर्ध्वा एवोपदधे । ततो वै स ज्यैष्ठ्य-मगच्छत् ॥ ९.६ ॥ ज्यैष्ठ्यं गच्छति । योऽग्निं नाचिकेतं चिनुते । य उ चैनमेवं वेद । अथ हैन मसावा-दित्यस्स्वर्गकामः । प्राचीरेवोपदधे । ततो वै सोऽभिस्वर्गं लोकमंजयत् । अभिस्वर्गं लोकं जयति । योऽग्निं नाचिकेतं चिनुते । य उ चैनमेवं वेद । स यदीच्छेत् ॥ ९.७ ॥ तेजस्वी यशस्वी ब्रह्मवर्चसी स्यामिति ।

प्राङ्ग होतु-र्धिष्ण्यादुत्सर्पेत् । ये यं प्रागाद्यशस्वती । सा मा प्रोर्णोतु । तेजसा यशसा ब्रह्मवर्चसेनेति । तेजस्व्येव यशस्वी ब्रह्मवर्चसी भवति । अथ यदीच्छेत् । भूयिष्ठं मे श्रद्दधीरन् । भूयिष्ठा दक्षिणा नयेयुरिति । दक्षिणासु नीयमानासु प्राच्येहि प्राच्येहीति प्राची जुषाणा वेत्वाज्यस्य स्वाहेति स्रुवेणोपहत्या हवनीये जुहुयात् ॥ ९.८ ॥ भूयिष्ठ-मेवास्मै श्रद्दधते । भूयिष्ठा दक्षिणा नयन्ति । पुरीष-मुपधाय । चिति कॢप्तिभिरभिमृश्य । अग्निं प्रणीयोपसमाधाय । चतस्र एता आहुती-र्जुहोति । त्वमग्ने रुद्र इति शतरुद्रीयस्य रूपम् । अग्नाविष्णू इति वसोर्धारायाः । अन्नपत इत्यन्नहोमः । सप्त ते अग्ने समिधस्सप्तजिह्वा इति विश्वप्रीः ॥९.९॥ ९॥

यां प्रथमा-मिष्टका-मुपदधाति । इमं तया लोकमभिजयति । अथो या अस्मिन् लोके देवताः । तासागं सायुज्यगं सलोकतामाप्नोति । यां द्वितीया-मुपदधाति । अन्तरिक्षलोकं तयाऽभिजयति । अथो या अन्तरिक्ष लोके देवताः । तासागं सायुज्यगं सलोकतामाप्नोति । यां तृतीयामुपदधाति । अमुं तया लोकमभिजयति ॥ १०.१ ॥ अथो या अमुष्मिन् लोके देवताः । तासागं सायुज्यगं स लोककतामाप्नोति । अथो या अमूरितरा अष्टादश । य एवामी उरवश्च वरीयागंसश्च लोकाः ।

तानेव ताभिरभिजयति । कामचारो हवा अस्योरुषु च वरीयस्सु च लोकेषु भवति । योऽग्निं नाचिकेतं चिनुते । य उ चैनमेवं वेद । संवत्सरो वा अग्निर्नाचिकेतः । तस्य वसन्तः शिरः ॥ १०.२ ॥ ग्रीष्मो दक्षिणः पक्षः । वर्षा उत्तरः । शरत् पुच्छम् । मासाः कर्मकाराः । अहोरात्रे शतरुद्रीयम् । पर्जन्यो वसोर्धारा । यथा वै पर्जन्यः सुवृष्टं वृष्ट्वा । प्रजाभ्यः सर्वान् कामान् संपूरयति । एवमेव स तस्य सर्वान् कामान् संपूरयति । योऽग्निं नाचिकेतं चिनुते ॥ १०.३ ॥ य उ चैनमेवं वेद । संवत्सरो वा अग्नि-र्नाचिकेतः । तस्य वसन्तः शिरः । ग्रीष्मो दक्षिणः पक्षः । वर्षाः पुच्छम् । शरदुत्तरः पक्षः । हेमन्तो मध्यम् । पूर्वपक्षाश्चितयः । अपर पक्षाः पुरीषम् । अहोरात्राणीष्टकाः । एष वा वसोऽग्निरग्निमयः पुनर्णवः । अग्निमयो हवै पुनर्णवो भूत्वा । स्वर्गं लोकमेति । आदित्यस्य सायुज्यम् । योऽग्निं नाचिकेतं चिनुते । य उ चैनमेवं वेद ॥ १०.४ ॥ १० ॥

हरिः ओ(३)म्

इति तैत्तिरीय-यजुर्ब्राह्मणे काठके

द्वितीयः प्रश्नः ॥

# तृतीयः प्रश्नः ॥

## हरिः ओ (४)म् ॥

तुभ्यं ता अंगिरस्तमाश्यामतं काम-मग्ने । आशानां त्वा विश्वा आशाः । अनुनोऽद्या नु मतिरन्विदनुमते त्वम् । कामो भूतस्य कामस्तदग्रे। ब्रह्मजज्ञानं पिता विराजाम् । यज्ञो रायोऽयं यज्ञः । आपो भद्रा आदित्पश्याभि । तुभ्यं भरन्ति यो देहृचः । पूर्वं देवा अपरेण प्राणापानौ । हव्यवाह१ स्विष्टम् ॥ १ ॥

देवेभ्यो वै स्वर्गो लोकस्तिरोऽभवत् । ते प्रजापति-मब्रुवन् । प्रजापते स्वर्गो वै नो लोकस्तिरोऽभूत् । तमन्विच्छेति । तं यज्ञ क्रतुभि-रन्वैच्छत् । तं यज्ञक्रतुभि-र्नान्वविन्दत् । तमिष्टिभि-रन्वैच्छत् । तमिष्टिभिरन्ववविन्दत् । तदिष्टीना-मिष्टित्वम् । एष्टयो ह वै नाम । ता इष्टय इत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥ २·१ ॥

तमाशाऽब्रवीत् । प्रजापत आशया वै श्राम्यसि । अहमुवा आशास्मि । मान्नुयजस्व । अथ ते सत्याऽऽशा भविष्यति । अनुस्वर्गं लोकं वेत्स्यसीति । स एत-मग्नये कामाय पुरोडाश-मष्टाकपालन्निरवपत् ।

आशायै चरुम् । अनुमत्यै चरुम् । ततो वैतस्य सत्याऽऽशाऽभवत् । अनुस्वर्गं लोकमविन्दत् । सत्याह वा अस्याऽऽशा भवति । अनुस्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये कामाय स्वाहाऽऽशायै स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ २'२ ॥ तं कामोऽब्रवीत् । प्रजापते कामेन वै श्राम्भसि । अहमु वै कामोऽस्मि । मां नु यजस्व । अथ ते सत्यः कामो भविष्यति । अनु स्वर्गं लोकं वेत्स्यसीति । स एतमग्नये कामाय पुरोडाश-मष्टाकपालं निरवपत् । कामाय चरुम् । अनुमत्यै चरुम् । ततो वै तस्य सत्यः कामोऽभवत् । अनुस्वर्गं लोकमविन्दत् । सत्यो ह वा अस्य कामो भवति । अनुस्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये कामाय स्वाहाकामाय स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहाऽग्नयेस्विष्टकृते स्वाहेति ॥ २'३ ॥ तं ब्रह्माब्रवीत् । प्रजापते ब्रह्मणा वै श्राम्यसि । अहमुवै ब्रह्मास्मि । मां नु यजस्व । अथ ते ब्रह्मण्वान् यज्ञो भविष्यति ।

अनु स्वर्गं लोकं वेत्स्यसीति। स एतमग्नये कामाय पुरोडाश-मष्टाकपालं निरवपत्। ब्रह्मणे चरुम्। अनुमत्यै चरुम्। ततो वै तस्य ब्रह्मण्वान् यज्ञोऽभवत्। अनुस्वर्गंलोकमविन्दत्। ब्रह्मण्वान् हवा अस्य यज्ञो भवति। अनुस्वर्गं लोकं विन्दति। य एतेन हविषा यजते। य उचैनदेवं वेद। सोऽत्र जुहोति। अग्नये कामाय स्वाहा ब्रह्मणे स्वाहा। अनुमत्यै स्वाहा प्रजापतये स्वाहा। स्वर्गाय लोकाय स्वाहा ऽग्नये स्विष्टकृते स्वाहेति॥ २.४॥ तं यज्ञोऽब्रवीत्। प्रजापते यज्ञेन वैश्राम्यसि। अहमुवै यज्ञोऽस्मि। मां नु यजस्व। अथ ते सत्यो यज्ञो भविष्यति। अनु स्वर्गं लोकं वेत्स्यसीति। स एतमग्नये कामाय पुरोडाश-मृष्टाकपालं निरवपत्। यज्ञाय चरुम्। अनुमत्यै चरुम्। ततो वै तस्य सत्यो यज्ञोऽभवत्। अनु स्वर्गं लोकमविन्दत्। सत्यो ह वा अस्य यज्ञो भवति। अनुस्वर्गं लोकं विन्दति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। अग्नये कामाय स्वाहा यज्ञाय स्वहा। अनुमत्यै स्वाहा प्रजापतये स्वाहा। स्वर्गाय लोकाय स्वाहा ऽग्नये स्विष्टकृते स्वाहेति॥ २.५॥ तमापो अब्रुवन्। प्रजापतेऽप्सु वै सर्वे कामाः श्रिताः। वयमु वा आपस्स्मः। अस्मान्नु

यंजस्व । अथ त्वयि सर्वे कामाः श्रयिष्यन्ते । अनु स्वर्गं लोकं वेत्स्यसीति । स एतमग्नये कामाय पुरोडाश-मष्टाकपालं निरवपत् । अद्भ्यश्चरुम् । अनुमत्यै चरुम् । ततो वै तस्मिन् सर्वे कामा अश्रयन्त । अनु स्वर्गं लोकमविन्दत् । सर्वे ह वा अस्मिन् कामाः श्रयन्ते । अनु स्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये कामाय स्वाहाऽद्भ्य-स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहाऽग्नयेस्विष्टकृते स्वाहेति ॥ २·६ ॥ तमग्निर्बलिमानब्रवीत् । प्रजापतेऽग्नये वै बलिमते सर्वाणि भूतानि बलिꣳ हरन्ति । अहमुवा अग्निर्बलिमानस्मि । मां नु यजस्व । अथ ते सर्वाणि भूतानि बलिꣳ हरिष्यन्ति । अनु स्वर्गं लोकं वेत्स्यसीति । स एतमग्नये कामाय पुरोडाश-मष्टाकपालं निरवपत् । अग्नये बलिमते चरुम् । अनुमत्यै चरुम् । ततो वै तस्मै सर्वाणि भूतानि बलिमहरन् । अनु स्वर्गं लोकमविन्दत् । सर्वाणि ह वा अस्मै भूतानि बलिꣳ हरन्ति । अनु स्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद ।

सोऽत्र जुहोति । अग्नये कामाय स्वाहा ऽग्नये बलिमते स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहा ऽग्नये स्विष्टकृते स्वाहेति ॥ २.७ ॥ तमनुवित्तिरब्रवीत् । प्रजापते स्वर्गं वै लोक-मनुविवित्ससि । अहमुवा अनुवित्तिरस्मि । मां नु यजस्व । अथ ते सत्याऽनुवित्तिर्भविष्यति । अनु स्वर्गं लोकं वेत्स्यसीति । स एतमग्नये कामाय पुरोडाशमष्टाकपालं निरवपत् । अनुवित्त्यै चरुम् । अनुमत्यै चरुम् । ततो वै तस्य सत्यानुवित्तिरभवत् । अनु स्वर्गं लोकमविन्दत् । सत्या हवा अस्यानुवित्तिर्भवति । अनु स्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये कामाय स्वाहा ऽनुवित्त्यै स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ २.८ ॥ ता वा एताः सप्तस्वर्गस्य लोकस्य द्वारः । दिवश्श्येनयोऽनुवित्तयो नाम । आशा प्रथमागं रक्षति । कामो द्वितीयाम् । ब्रह्म तृतीयाम् । यज्ञश्चतुर्थीम् । आपः पंचमीम् । अग्नि-र्बलिमान् षष्ठीम् । अनुवित्तिस्सप्तमीम् । अनु हवै स्वर्गं

लोकं विन्दति । कामचारोऽस्य स्वर्गे लोके भवति । य एता-
भिरिष्टिभिर्यजते । य उ चैना एवं वेद । तास्वन्विष्टि । पष्ठौ ही वरां
दधात्कःसंच । स्त्रियै चाभारः समृद्धयै ॥ २.९ ॥ २ ॥

तपसा देवा देवता-मग्र आयन् । तपस ऋषयः स्वरन्वविन्दन् ।
तपसा सपत्नान् प्रणुदामारातीः । येनेदं विश्वं परिभूतं यदस्ति ।
प्रथमजं देवः हविषा विधेम । स्वयम्भु ब्रह्म परमं तपो यत् । स एव
पुत्रस्स पिता स माता । तपो ह यक्षं प्रथमगं संबभूव । श्रद्धया
देवो देवत्व-मश्नुते । श्रद्धा प्रतिष्ठा लोकस्य देवी ॥ ३.१ ॥ सा
नो जुषाणोप यज्ञमागात् । कामं वत्साऽमृतं दुहाना । श्रद्धा देवी
प्रथमजा ऋतस्य । विश्वस्य भर्त्री जगतः प्रतिष्ठा । तागं श्रद्धागं
हविषा यजामहे । सा नो लोकममृतं दधातु । ईशाना देवी भुवनस्याधि
पत्नी । आगात्सत्यगं हविरिदं जुषाणम् । यस्माद्देवा जज्ञिरे भुवनं
च विश्वे । तस्मै विधेम हविषा घृतेन ॥ ३.२ ॥ यथा देवैः
सधमादं मदेम । यस्य प्रतिष्ठोर्वन्तरिक्षम् । यस्माद्देवा जज्ञिरे भुवनं
सर्वे । तत्सत्यमर्चदुपयज्ञन्न आगात् । ब्रह्माहुती-रुपमोदमानम् ।

मनसो वशे सर्वमिदं बभूव । नान्यस्य मनो वश-मन्वियाय । भीष्मो हि देव स्सहस्सहीयान् । मनो जुषाण उपयज्ञ मागात् । आकूतीना-मधिपतिं चेतसां च ॥ ३·३ ॥ संकल्पजूतिं देवं विपश्चिम् । मनो राजान-मिह वर्धयन्तः । उपहवे ऽस्य सुमतौ स्याम । चरणं पवित्रं विततं पुराणं । येन पूतस्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूताः । अति पाप्मान मरातिं तरेम । लोकस्य द्वार-मर्चिमत्-पवित्रम् । ज्योतिष्मद्-भ्राजमानं महस्वत् । अमृतस्य धारा बहुधा दोहमानम् । चरणं नो लोके सुधितां दधातु । अग्निर्मूर्धा भुवः । अनु नोऽद्यानुमतिरन्विद-मते त्वम् । हव्यवाहगं स्विष्टम् ॥ ३·४ ॥ ३ ॥

देवेभ्यो वै स्वर्गो लोकस्तिरोऽभवत् । प्रजापति-मब्रुवन् । प्रजापते स्वर्गो वै नो लोकस्तिरोऽभूत् । तमन्विच्छेति । तं यज्ञ क्रतुभिरन्वैच्छत् । तं यज्ञक्रतुभि र्नान्वविन्दत् । तमिष्टिभि-रन्वैच्छत् । तमिष्टिभि-रन्वविन्दत् । तदिष्टीना-मिष्टित्वम् । एष्टयो ह वै नाम । ता इष्टय इत्याचक्षते परोक्षेण । परोक्ष प्रिया इव हि देवाः ॥ ४·१ ॥ तं तपोऽब्रवीत् । प्रजापते तपसा वै श्राम्यसि । अहमु वै तमोऽस्मि ।

मां नु यजस्व। अथ ते सत्यं तपो भविष्यति। अनु स्वर्गं लोकं वेत्स्यसीति। स एत माग्नेय-मष्टा-कपालं निरवपत्। तपसे चरुम्। अनुमत्यै चरुम्। ततो वै तस्य सत्यं तपोऽभवत्। अनु स्वर्गं लोकमविन्दत्। सत्यगं ह्वा अस्य तपो भवति। अनु स्वर्गं लोकं विन्दति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। अग्नये स्वाहा तपते स्वाहा। अनुमत्यै स्वाहा प्रजापतये स्वाहा। स्वर्गाय लोकाय स्वाहा ऽग्नये स्विष्टकृते स्वाहेति॥ ४·२॥ तगं श्रद्धाऽब्रवीत्। प्रजापते श्रद्धया वैश्राम्यसि। अहमु वै श्रद्धाऽस्मि। मां नु यजस्व। अथ ते सत्या श्रद्धा भविष्यति। अनु स्वर्गं लोकं वेत्स्यसीति। स एत-माग्नेय-मष्टाकपालं निरवपत्। श्रद्धायै चरुम्। अनुमत्यै चरुम्। ततो वै तस्य सत्या श्रद्धा ऽभवत्। अनु स्वर्गं लोकमविन्दत्। सत्या ह वा अस्य श्रद्धा भवति। अनु स्वर्गं लोकं विन्दति। य एतेन हविषा यजते। य उ चैनदेवं वेद। सोऽत्र जुहोति। अग्नये स्वाहा श्रद्धायै स्वाहा। अनुमत्यै स्वाहा प्रजापतये स्वाहा। स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति॥ ४.३॥

सत्यमब्रवीत् । प्रजापते सत्येन वै श्राम्यसि । अहमु वै सत्यमस्मि । नु यजस्व । अथ ते सत्यगं सत्यं भविष्यति । अनु स्वर्गं लोकं वेत्स्यति । स एतमाग्नेय-मष्टाकपालं निरवपत् । सत्याय चरुम् । अनुमत्यै चरुम् । ततो वै तस्य सत्यगं सत्यमभवत् । अनु स्वर्गं लोकमविन्दत् । सत्यगं ह वा अस्य सत्यं भवति । अनु स्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये स्वाहा सत्याय स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहा ऽग्नये स्विष्टकृते स्वाहेति ॥ ४·४ ॥ तं मनोऽब्रवीत् । प्रजापते मनसा वै श्राम्यसि । अहमु वै मनोऽस्मि । मां नु यजस्व । अथ ते सत्यं मनो भविष्यति । अनु स्वर्गं लोकं वेत्स्यसीति । स एत-माग्नेय-मष्टाकपालं निरवपत् । मनसे चरुम् । अनुमत्यै चरुम् । ततो वै तस्य सत्यं मनोऽभवत् । अनु स्वर्गं लोकमविन्दत् । सत्यगं ह वा अस्य मनो भवति । अनु स्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये स्वाहा मनसे स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय

स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ ४·५ ॥ तं चरण-मब्रवीत् । प्रजापते चरणेन वैश्राम्यसि । अहमु वै चरणमस्मि । मां नु यजस्व । अथ ते सत्यं चरणं भविष्यति । अनु स्वर्गं लोकं वेत्स्यसीति । स एतमाग्नेयमष्टाकपालं निरवपत् । चरणाय चरुम् । अनुमत्यै चरुम् । ततो वै तस्य सत्यं चरणमभवत् । अनु स्वर्गं लोकमविन्दत् । सत्यग्ं ह वा अस्य चरणं भवति । अनु स्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये स्वाहा चरणाय स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ ४·६ ॥ ता वा एताः पंच स्वर्गस्य लोकस्य द्वारः । अगाधा अनुवित्तयो नाम । तपः प्रथमाग्ं रक्षति । श्रद्धा द्वितीयाम् । सत्यं तृतीयाम् । मनश्चतुर्थीम् । चरणं पंचमीम् । अनु ह वै स्वर्गं लोकं विन्दति । कामचारोऽस्य स्वर्गे लोके भवति । य एताभिरिष्टिभि-र्यजते । य उ चैना एवं वेद । तास्वन्विष्टि । पष्ठौ ही वरां दद्यात्कग्ंसंच । स्त्रियै चाभारग्ं समृद्धचै ॥ ४·७ ॥　　४ ॥

ब्रह्म वै चतुर्होतारः । चतुर्होतृभ्योऽधियज्ञो निर्मितः । नैनग्ं शप्तम् । नाभिचरित-मागच्छति । य एवं वेद । यो ह वै चतुर्होतृणां चतुर्होतृत्वं वेद । आथो पंचहोतृत्वम् । सर्वा हास्मै दिशः कल्पन्ते । वाचस्पति-र्होता दशहोतॄणाम् । पृथिवी होता चतुर्होतॄणाम् ॥५·१॥ अग्निर्होता पंचहोतणाम् । वाग्घोता षड्होतॄणाम् । महाहविर्होता सप्तहोतॄणां । एतेद्वै चतुर्होतृणां चतुर्होतृत्वम् । अथो पंचहोतृत्वम् । सर्वा हास्मै दिशःकल्पन्ते । य एवं वेद । एषा वै सर्वविद्या । एतद्भेषजम् । एषा पंक्तिः स्वर्गस्य लोकस्यांजसायनिस्स्रुतिः ॥ ५·२ ॥ एतान् योऽध्यैत्य छंदिर्ददर्शे यावत्तरसम् । स्वरेति । अनपब्रवस्सर्व-मायुरेति । विन्दते प्रजाम् । रायस्पोषं गौपत्यम् । ब्रह्मवर्चसी भवति । एतान् योऽध्यैति । स्पृणोत्यात्मानम् । प्रजां पितॄन् । एतान् वा अरुण औपवेशिर्विदां चकार ॥ ५·३ ॥ एतैरधिवाद-मपाजयत् । अथो विश्वं पाप्मानम् । स्वर्ययौ । एतान् योऽध्यैति । अधिवादं जयति । अथो विश्वं पाप्मानम् । स्वरेति । एतैरग्निं चिन्वीत स्वर्गकामः । एतैरायुष्कामः । प्रजापशु-कामो वा ॥ ५·४ ॥ पुरस्ताद्दशहोतार-मुदंच-मुपदधाति यावत्पदम् ।

हृदयं यजुषी पत्न्यौ च । दक्षिणतः प्रांचं चतुर्होतारम् । पश्चादुदंचं पंचहोतारम् । उत्तरतः प्रांचगं षड्ढोतारम् । उपरिष्टात्प्रांचगं सप्तहोतारम् । हृदयं यजूगंषि पत्न्यश्च । यथावकाशं ग्रहान् । यथावकाशं प्रतिग्रहान् लोकं पृणाश्च । सर्वा हास्यै ता देवताः प्रीता अभीष्टा भवन्ति ॥ ५·५ ॥ सदेव-मग्निं चिनुते । रथसंमितश्चेतव्यः । वज्रो वै रथः । वज्रेणेव पाप्मानं भ्रातृव्यगं स्तृणुते । पक्षस्संमितश्चेतव्यः । एतावान् वै रथः । यावत्पक्षः । रथसंमितमेव चिनुते । इममेव लोकं पशुबन्धेनाभिजयति । अथो अग्निष्टोमेन ॥ ५·६ ॥ आन्तरिक्ष-मुक्थ्येन । स्वरतिरात्रेण । सर्वान् लोकानहीनेन । अथो सत्रेण । वरो दक्षिणा । वरेणैव वरगं स्पृणोति । आत्मा हि वरः । एकविगंशति-दक्षिणा ददाति । एकविगंशो वा इतस्स्वर्गो लोकः । प्रस्वर्गं लोकमाप्नोति ॥ ५·७ ॥ असावादित्य एकविगंशः । अमुमेवादित्य-माप्नोति । शतं ददाति । शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रतिष्ठति । सहस्रं ददाति । सहस्रसंमितस्स्वर्गो लोकः । स्वर्गस्य लोकस्याभिजित्यै । अन्विष्टकं दक्षिणा ददाति । सर्वाणि वयागंसि ॥ ५·८ ॥

र्वस्याप्त्यै । सर्वस्यावरुद्ध्यै । यदि न विन्देत । मन्थाने
ावतो दद्यादोदनान् वा । अश्नुते तं कामम् । यस्मै
कामायाभिश्रीयते । पष्ठौहीन्त्वन्तर्वर्तीं दद्यात् । साहि सर्वाणि
यागंसि । सर्वस्याप्त्यै । सर्वस्यावरुद्ध्यै ॥ ५.९ ॥ हिरण्यं ददाति ।
हिरण्यज्योतिरेव स्वर्गं लोकमेति । वासो ददाति । तेनायुः प्रतिरते ।
वेदि तृतीये यजेत । त्रिषत्याहि देवाः । स सत्यमग्निं चिनुते ।
तदेतत्पशुबन्धे ब्राह्मणं ब्रूयात् । नेतरेषु यज्ञेषु । यो ह वै चतुर्होतॄनन्
सवनं तर्पयितव्यान् वेद ॥ ५.१० ॥ तृप्यति प्रजया पशुभिः ।
उपैनगं सोमपीथो नमति । एते वै चतुर्होतारोऽनुसवनं तर्पयितव्याः ।
ये ब्राह्मणा बहुविदः । तेभ्यो यद्दक्षिणा न नयेत् । दुरिष्टगं स्यात् ।
अग्निमस्य वृञ्जीरन् । तेभ्यो यथाश्रद्धं दद्यात् । स्विष्टमेवैतत् क्रियते ।
नास्याग्निं वृञ्जते ॥ ५.११ ॥ हिरण्येष्टको भवति । यावदुत्तम-मंगुलि-
काण्डं यज्ञपुरुषासंमितम् । तेजो हिरण्यम् । यदि हिरण्यं न विन्देत् ।
शर्करा अक्ता उपदध्यात् । तेजो घृतम् । स तेजसमेवाग्निं चिनुते ।
अग्निं चित्वा सौत्रामण्या यजेत मैत्रावरुण्या वा । वीर्येण वा एष व्यृद्ध्यते ।

योऽग्निं चिनुते ॥ ५·१२ ॥ यावदेव वीर्यम्। तदस्मिन् दधाति। ब्रह्मणस्सायुज्यगं सलोकता-माप्नोति। एतासामेव देवतानागं सायुज्यम्। सार्ष्टितागं समानलोकतामाप्नोति। य एतमग्निं चिनुते। य उ चैनमेवं वेद। एतदेव सावित्रे ब्राह्मणम्। अथो नाचिकेते ॥ ७·१३ ॥ ५ ॥

यच्चामृतं यच्च मर्त्यम्। यच्च प्राणिति यच्च न। सर्वास्ता इष्टकाः कृत्वा। उप कामदुघा दधे। तेन ऋषिणा तेन ब्रह्मणा। तया देवतयाऽङ्गिरस्वद्ध्रुवासीद। सर्वाः स्त्रियः सर्वान् पुगंसः। सर्वं न स्त्रीपुमंच यत्। सर्वास्ताः। यावन्तः पागंसवो भूमेः ॥ ६·१ ॥ संख्याता देवमायया। सर्वास्ताः। यावन्त ऊषाः पशूनाम्। पृथिव्यां पुष्टिर्हिताः। सर्वास्ताः। यावतीस्सिकताः सर्वाः। अप्स्वन्तश्च याः श्रिताः। सर्वास्ताः। यावतीः शर्करा धृत्यै। अस्यां पृथिव्यामधि ॥ ६·२ ॥ सर्वास्ताः। यावन्तोऽश्मानोऽस्यां पृथिव्याम्। प्रतिष्ठा सुप्रतिष्ठिताः। सर्वास्ताः। यावतीर्वीरुधः सर्वाः। विष्ठिताः पृथिवीमनु। सर्वास्ताः। यावतीरोषधीः सर्वाः। विष्ठिताः पृथिवीमनु। सर्वास्ताः ॥ ६·३ ॥ यावन्तो वनस्पतयः। अस्यां पृथिव्यामधि। सर्वास्ताः। यावन्तो ग्राम्याः

पशवस्सर्वे । आरण्याश्च ये । सर्वास्ताः । ये द्विपादश्चतुष्पादः । अपाद उदर सर्पिणः । सर्वास्ताः । यावदांजन-मुच्यते ॥ ६·४ ॥

देवत्रा यच्च मानुषम् । सर्वास्ताः । यावत्कृष्णायसगं सर्वम् । देवत्रा यच्च मानुषम् । सर्वास्ताः । यावल्लोहायसगं सर्वम् । देवत्रा यच्च मानुषम् । सर्वास्ताः । सर्वगं सीसगं सर्वं त्रपु । देवत्रा यच्च मानुषम् ॥ ६·५ ॥

सर्वास्ताः । सर्वगं हिरण्यगं रजतम् । देवत्रा यच्च मानुषम् । सर्वास्ताः । सर्वगं सुवर्णगं हरितम् । देवत्रा यच्च मानुषम् । सर्वास्ता इष्टकाः कृत्वा । उपकामदुघादधे । तेन ऋषिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ ६·६ ॥

[यच्च स्त्रियः पागंसव ऊषाः सिकता-श्शर्करा अश्मानो वीरुध ओषधीर्वनस्पतयो ग्राम्या ये द्विपादो यावदांजनं कृष्णायसं लोहायसगं सीसगं हिरण्यगं सुवर्णगं हरितमष्टादश ॥] ६ ॥

सर्वा दिशो दिक्षु । यच्चान्तर्भूतं प्रतिष्ठितम् । सर्वास्ता इष्टकाः कृत्वा । उप कामदुघादधे । तेन ऋषिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिरस्वध्रुवासीद । अन्तरिक्षं च केवलम् । यच्चास्मिन्नन्तराहितम् ।

सर्वास्ताः । आन्तरिक्षश्च याः प्रजाः ॥ ७.१ ॥ गन्धर्वाप्सरसश्चये । सर्वास्ताः । सर्वानुदारान् सलिलान् । अन्तरिक्षे प्रतिष्ठितान् । सर्वास्ताः । सर्वानुदारान् सलिलान् । स्थावराः प्रोष्यांश्च ये । सर्वास्ताः । सर्वान्धुनिंगु सर्वानूध्वगुंसान् । हिमो यश्च शीयते ॥ ७.२ ॥ सर्वास्ताः । सर्वान् मरीचीन् विततान् । नीहारो यश्च शीयते । सर्वास्ताः । सर्वा विद्युतस्सर्वान् स्तनयित्नून् । ह्रादुनी-र्यश्च शीयते । सर्वास्ताः । सर्वा-स्स्रवन्तीस्सरितः । सर्वमप्सु चरं च यत् । सर्वास्ताः ॥ ७.३ ॥ याश्च कूप्या याश्च नाद्या-स्समुद्रियाः । याश्च वैशन्ती-रुत प्रासचीर्याः । सर्वास्ताः । ये चोत्तिष्ठन्ति जीमूताः । याश्च वर्षन्ति वृष्टयः । सर्वास्ताः । तपस्तेज आकाशम् । यच्चाकाशे प्रतिष्ठितम् । सर्वास्ताः । वायुं वयागुंसि सर्वाणि ॥ ७.४ ॥ अन्तरिक्षचरं च यत् । सर्वास्ताः । अग्निगुं सूर्यं चन्द्रम् । मित्रं वरुणं भगम् । सर्वास्ताः । सत्यगुं श्रद्धां तपो दमम् । नामरूपं च भूतानाम् । सर्वास्ता इष्टकाः कृत्वा । उपकाम-दुघादधे । तेन ऋषिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद ॥ ७.५ ॥ ७ ॥

[दिशोऽन्तरिक्ष-मान्तरिक्ष्यं उदारानुदारां घुनिं मरीचीन् विद्युत-
स्स्रवन्ती-र्याश्च ये च तपो वायु-मग्निगुं सत्यं पंचदश ॥] ७ ॥

सर्वान् दिवगुं सर्वान् देवान् दिवि । यच्चान्त-र्भूतं प्रतिष्ठितम् ।
सर्वास्ता इष्टकाः कृत्वा । उपकामदुघांदधे । तेन ऋषिणा तेन ब्रह्मणा ।
तया देवतयाऽङ्गिरस्वध्रुवासीद । यावतीस्तारकाः सर्वाः । विततां
रोचने दिवि । सर्वास्ताः । ऋचो यजूगुंपि सामानि ॥ ८.१ ॥
अथर्वांगिरसश्च ये । सर्वास्ताः । इतिहासपुराणं च । सर्पदेवजनाश्च
ये । सर्वास्ताः । ये च लोका येचालोकाः । अन्तर्भूतं प्रतिष्ठितम् ।
सर्वास्ताः । यच्च ब्रह्म यच्चाब्रह्म । अन्तर्ब्रह्मन् प्रतिष्ठितम् ॥ ८.२ ॥
सर्वास्ताः । अहोरात्राणि सर्वाणि । अर्धमासागुंश्च केवलान् । सर्वास्ताः ।
सर्वान् ऋतून् सर्वान् मासान् । संवत्सरंच केवलम् । सर्वास्ताः । सर्वे
भूतगुं सर्वं भव्यम् । यच्चातो ऽधि भविष्यति । सर्वास्ता इष्टकाः कृत्वा ।
उपकामदुघांदधे । तेन ऋषिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिर-
स्वध्रुवासीद ॥ ८.३ ॥

[दिवं तारका ऋचं इतिहासपुराणं च ये च क्चाहोरात्राण्यतून् भूतं नव ॥] ८ ॥

ऋचां प्राची महती दिगुच्यते। दक्षिणामाहुर्यजुषामपाराम्। अथर्वणामंगिरसां प्रतीची। साम्ना-मुदीची महती दिगुच्यते। ऋग्भिः पूर्वाह्णे दिवि देव ईयते। यजुर्वेदे तिष्ठति मध्ये अह्नः। सामवेदेनास्त-मये महीयते। वेदैरशून्यस्त्रिभिरेति सूर्यः। ऋग्भ्यो जाताऽ सर्वशो मूर्तिमाहुः। सर्वा गतिर्याजुषी हैव शश्वत् ॥ ९·१ ॥ सर्वं तेजस्सा-मरूप्यगूं ह शश्वत्। सर्वगूं हेदं ब्रह्मणा हैवसृष्टम्। ऋग्भ्यो जातं वैश्यं वर्णमाहुः। यजुर्वेदं क्षत्रियस्याहु-र्योनिम्। सामवेदो ब्राह्मणानां प्रसूतिः। पूर्वे पूर्वेभ्यो वच एतदूचुः। आदर्शमग्निं चिन्वानाः। पूर्वे विश्वसृजो ऽमृताः। शतं वर्षसहस्राणि। दीक्षिताऽसत्रमासत ॥ ९· २ ॥ तप आसीद्गृहपतिः। ब्रह्म ब्रह्माभवत्स्वयम्। सत्यऽ ह होतैषा मासीत्। यद्विश्वसृज आसत। अमृतमेभ्य उदगायत्। सहस्रं परिवत्सरान्। भूतगूं ह प्रस्तोतैषामासीत्। भविष्यत्प्रतिचाहरत्। प्राणो अध्वर्युरभवत्। इदगूं सर्वगूं सिषासताम् ॥ ९·३ ॥ अपानो विद्वानावृतः। प्रति प्राति

ध्रुव्यध्वरे । आर्तवा उपगातारः । सदस्या ऋतवोऽभवन् । अर्धमासाश्च मासाश्च । चमसाध्वर्यवोऽभवन् । अच्छगँसद्ब्रह्मणस्तेजः । अच्छावाको ऽभवद्यशः । ऋतमेषां प्रशास्तासीत् । यद्विश्वसृज आसत ॥९.४॥ ऊर्ग्राजानमुदवहत् । ध्रुवगोपस्सहोऽभवत् । ओजोऽभ्यष्टौद्ग्राव्ण्णः । यद्विश्वसृज आसत । अपचितिः पोत्रीया-मयजत् । नेष्ट्रीया-मयजत्त्विषिः । आग्नीध्राद्विदुषी सत्यम् । श्रद्धा हैवायजत्स्वयम् । इरापत्नी विश्वसृजाम् । आकूति-रपिनड्ढविः ॥ ९.५ ॥ इध्मगँह क्षुच्चैभ्य उग्रे । तृष्णाचावहता-मुभे । वागेषागँ सुब्रह्मण्यासीत् । छन्दो योगान् विजानती । कल्प-तन्त्राणि तन्वानाहः । सगँस्थाश्च सर्वशः । अहोरात्रे पशुपाल्यौ । मुहूर्ताः प्रेष्या अभवन् । मृत्युस्तदभवद्धाता । शमितोग्रो विशांपतिः ॥ ९.६ ॥ विश्वसृजः प्रथमास्सत्र-मासत । सहस्र-समं प्रसुतेन यन्तः । ततो ह जज्ञे भुवनस्य गोपाः । हिरण्मयश्शकुनि-र्ब्रह्मनाम । येन सूर्यस्तपति तेजसेद्धः । पिता पुत्रेण पितृमान् योनि योनौ । ना वेदविन्मनुते तं बृहन्तम् । सर्वानुभुमात्मानगँ संपराये । एष नित्यो महिमा ब्राह्मणस्य । न कर्मणा वर्धते नो कनीयान् ॥ ९.७ ॥ तस्यैवात्मा पदवित्तं विदित्वा ।